मुग्धा मध्या प्रगल्भा च स्वकीया त्रिविधा मता ॥ १.४७ ॥

मुग्धा नववधूस्तत्र नवयौवनभूषिता ।
नवानङ्गा रहःस्थापि लज्जाप्रायरतिर्यथा ॥ १.४८ ॥[36]

---

11294, 326; ०दर्श्यन्ते G [प्र०], P, $J_2$, 11294 (v.l.), 16654.

[34] ०बिसिनी० ] A, P, D; ०कदली० G.

[35] ०सौष्ठवे कृतम् G, P, $J_2$, 512, 11294, 326; ०सौष्ठवेन किम D, 16654.

[36] नवानङ्गा ] A, G (R 12.18: रतिनैपुणानभिज्ञा); नवानङ्ग० P, D. रहःस्था ] A, G; ०रहस्या P, D. ०पि ] A, G, D; च

गतं कर्णाभ्यर्णं प्रसरति तथाप्यक्षियुगलं
कुचौ कुम्भारम्भौ तदपि चिबुकोत्तम्भनरुची ।
नितम्बप्राग्भारो गुरुरपि गुरुत्वं मृगयते
कथंचिन्नो तृप्तिस्तरुणिमनि मन्ये मृगदृशः ॥ १.४९ ॥[37]

यथा रोमाञ्चोऽयं स्तनभुवि लसत्स्वेदकणिको
यथा दृष्टिस्तिर्यक्पतति सहसा संकुचति च ।
तथा शङ्केऽमुष्याः प्रणयिनि दरास्वादितरसं
न मध्यस्थं चेतः प्रगुणरमणीयं न च दृढम् ॥ १.५० ॥[38]

विरम नाथ विमुञ्च ममाञ्चलं
शमय दीपमिमं समया सखी ।
इति नवोढवधूवचसा युवा
मुदमगादधिकां सुरतादपि ॥ १.५१ ॥[39]

सकम्पा चुम्बने वक्त्रं हरत्येषावगूहिता ।
परावृत्य चिरं तल्प आस्ते रन्तुं न वाञ्छति ॥ १.५२ ॥[40]

---

P.

[37] ०णं ] G, P, J; ०र्णे A, D. ०आरम्भौ ] A, G, D; ०आकारौ P.

[38]यथा ] P, D; पुनर् G.

[39] इमं ... सखी ] G (comm.), D, 512, 11294, 16654; इमं ... सखीम् G (text), P, J; इयं ... सखी Ś, 16654; इयं न गता सखी A. अगादधिकां ] G, P, D; अवाप परां A.

[40] अव० ] A, G, P; उप० D. तल्प ] G, P, D; तल्पम् A. न ] A, $J_2$; च G (text), P, D (PS 1.44: तद्विरन्तुं समीहते)

अपहरति यदास्यं चुम्बने श्लिष्यमाणा
वलयति शयनीये कम्पते च प्रकामम् ।
वदति च यदलक्ष्यं किञ्चिदुक्तापि भूयो
रमयति सुतरां तच्चित्तमन्तर्नवोढा ॥ १.५३ ॥[41]

मुग्धामावर्जयत्येष मृदूपायेन सान्त्वयन् ।
नातिभीतिकरैर्भावैर्निबन्धैर्बालभीषकैः ॥ १.५४ ॥[42]

सरति सरसस्तीरादेषा भ्रमद्भ्रमरावली
सुमुखि विमुखी पद्मे मन्ये तवास्यपिपासया ।
इति निगदिते किञ्चिद्भीत्या विवर्तितकन्धरा
वदनकमले भर्त्रा बाला चिरं परिचुम्बिता ॥ १.५५ ॥

अन्यां निषेवमाणेऽपि यदि कुप्यति सा प्रिये ।
रोदित्यस्याग्रतः स्वल्पमनुनीता च तुष्यति ॥ १.५६ ॥[43]

मन्यौ कृते प्रथममेव विकारमन्यं
नो जानती नववधू रुदती परं सा ।
धूर्तेन लोचनजलं परिमृज्य गाढं
संचुम्ब्य चाधरदलं गमिता प्रसादम् ॥ १.५७ ॥[44]

आरूढयौवना मध्या प्रादुर्भूतमनोभवा ।

---

[41] वलयति ] A, G; वलति च P, D. तच् ] G, P, D; नश् A.

[42] आवर्जयत्् ] P, D; आवर्तयत्् A; अनुनयत्् G. भावैर् … ०भीषकैः] G, D; वाक्यैर् … ०भीषितैः P (PS 1.46);

चित्रैर्निर्बनधैर्बालभूषितैः A.

[43] ऽपि ] A, G, D; तु P.

[44] गाढं ] G, D; बाढं A, P. ०दलं ] A, P; ०दले D; ०तले G.

प्रगल्भवचना किञ्चिद्विचित्रसुरता यथा ॥ १.५८ ॥[45]

तरत्तारं चक्षुः क्षपयति मुनीनामपि दृशः
कुचद्वन्द्वाक्रान्तं हृदयमहृदः कान्न कुरुते ।
गतिर्मन्दीभूता हरति गमनं मन्मथवता-
महो तन्व्यास्तुल्यं तरुणिमनि सर्वं विजयते ॥ १.५९ ॥[46]

दृष्टिः स्निह्यति निर्भरं प्रियतमे वैदग्ध्यभाजो गिरः
कामं कुन्तलमालिकाविरचने त्यक्तान्यकर्मा करः ।
वक्षः संव्रियते पुनः पुनरिदं लीलालसं गम्यते
जाता सुभ्रु मनोरमा तव दशा कस्मादकस्मादियम् ॥ १.६० ॥[47]

सुभग कुरबकस्त्वं नो किमालिङ्गनोत्कः
किमु मुखमदिरेच्छुः केसरो नो हृदिस्थः ।
त्वयि नियतमशोके युज्यते पादघातः
प्रियमिति परिहासात्पेशलं काचिदूचे ॥ १.६१ ॥[48]

कान्ते तथा कथमपि प्रथितं मृगाक्ष्या
चातुर्यमुद्धतमनोभवया रतेषु ।
तत्कूजितान्यनुवदद्भिरनेकवारं

---

[45] विचित्रसुरता ] P, D (R 12.21: ०विचित्रसुरतचातुर्या); विराजद्विभ्रमा G.

[46] तुल्यं ] A, G, P, D; स्वल्पं $J_2$; तुल्यं तन्व्यास् [*conj. ऽतुल्यं ?] J.

[47] कामं ] A, G, D, $J_2$; पाणिः P. ०मालिका० ] P, D; ०पालिका० G. त्यक्तान्यकर्मा करः ] G, D; त्यक्तान्यकर्माश्रयः P; ०कार्यग्रहः Ś # 502, ०कर्माग्रहः $J_2$, 512. वक्षः ] A, G, D, Ś, $J_2$, 512, 11294, 324 (cf. PS 1.52: स्तनयुगतिरोधानरचना); वक्रं P; चक्षुः 16654 लीलालसं ] G, D, P; भारालसं Ś.

[48] उत्कः ] A, G, P, $J_2$, 512; उक्तः D, 11294, 16654. नो हृदिस्थः ] G, P, D; वासि दृष्टः A.

शिष्यायितं गृहकपोतशतैर्यथा स्यात् ॥ १.६२ ॥[49]

गाढं व्याप्रियते कान्तं पिबतीव रतावियम् ।
विशतीव तदङ्गेषु मुह्यतीव सुखे यथा ॥ १.६३ ॥[50]

कृत्वानेकविधां रसेन सुरते केलिं कथञ्चिच्चिरा-
त्प्राप्तान्तःसुखमीलिताक्षियुगला स्विद्यत्कपोलस्थली ।
सुप्तेयं किल सुन्दरीति सुभगः स्वैरं तथैवास्वज-
द्गाढानङ्गविमर्दनिःसहवपुर्निद्रां यथैवागता ॥ १.६४ ॥[51]

सा धीरा वक्ति वक्रोक्त्या प्रियं कोपात्कृतागसम् ।
मध्या रोदित्युपालम्भैरधीरा परुषं यथा ॥ १.६५ ॥[52]

उपेत्य तां दृढपरिरम्भलालस-
श्चिरादभूः प्रमुषितचारुचन्दनः ।
धृताञ्जनः सपदि तदक्षिचुम्बना-
दिहैव ते प्रिय विदिता कृतार्थता ॥ १.६६ ॥[53]

यत्रार्कायितमिन्दुना सरसिजैरङ्गारपुञ्जायितं
क्रुद्धायां मयि नाथ ते कदलिकाकाण्डैरलातायितम् ।
कालोऽन्यः खलु कोऽपि सोऽमृतमयो जातो विषात्माधुना

---

49 ◦कूजितान्यनु◦ ] P, D; ◦कूजितं मृदु G. स्यात् ] A, G P, $J_2$, 16654, 326; स्याः D, 512.

50 गाढं ] P, D; बाढं A, G. इयम् ] A, G, D; प्रियम् P.

51 चिरात् ] A, P, D; रसात् G. किल ] G, P, D; किमु A. प्राप्त◦ ] G, P, D; प्राप्य A. ◦अनङ्ग◦ ] G, P, D; ◦आलिङ्ग◦ A. यथैव] conj.; सहैव G, P, D, $J_2$, 326; य एव 512; स एव A, 11294, 16654. आगता ] conj; आगतः G, P, D.

52 रोदित्य् A, G, D (R 12.23: सास्रैरुपालम्भैः); वदत्य् P.

53 धृत◦ ] G, P, D; हृत◦ A.

धिक्त्वां धूर्त विनिर्यदश्रुरबला मोहं रुदन्ती गता ॥ १.६७ ॥[54]

सार्धं मनोरथशतैस्तव धूर्त कान्ता
सैव स्थिता मनसि कृत्रिमभावरम्या ।
अस्माकमस्ति न कथंचिदिहावकाश-
स्तस्मात्कृतं चरणपातविडम्बनाभिः ॥ १.६८ ॥[55]

लब्धायतिः प्रगल्भा स्यात्समस्तरतिकोविदा ।
आक्रान्तनायका बाढं विराजद्विभ्रमा यथा ॥ १.६९ ॥[56]

सेयं पङ्कजिनी मृणाललतिकामादाय यस्याः प्रियो
हारं मे कुरुते पयोधरतटे प्रत्यग्रताराारुचम् ।
बन्धूकं च तदेतदालि विदलद्यत्तेन सीमन्तितं
सर्वाशाविजिगीषुपुष्पधनुषो बाणश्रियं धास्यति ॥ १.७० ॥[57]

यत्र स्वेदलवैरलं विलुलितैर्व्यालुप्यते चन्दनं
स्वच्छन्दैर्मणितैश्च यत्र रणितं निह्नूयते नूपुरम् ।
यत्रायान्त्यचिरेण सर्वविषयाः कामं तदेकाग्रतां
सख्यस्तत्सुरतं भणामि रतये शेषा तु लोकस्थितिः ॥ १.७१ ॥[58]

---

[54] जातो ] G, P, D; ऽन्योऽयं A. रुदन्ती ] G, D; वदन्ती A, P.

[55] ०भाव० ] G, P, D; ०राग० A. कथंचिद् ] P, 512, 11294, 16654, 326; हि कश्चिद् ] G, D.

[56] ०रति० ] P, D (R 12.24: रतिकर्मणि); ०रत० G (V 3.60; DR 2.18), ०रस० A. ०नायका ] A, G, P, 326, 11294, 16654 (R 12.24: आक्रान्तानायकमनाः; DR 2.18); ०नायिका D, $J_2$, 512.

[57] प्रत्यग्र० ] G, P, D, $J_2$; पर्यस्त० A. ०रुचम् ] A, G, D, $J_2$, 512, 11294, 16654; ०रुचिम् P, 326. यत्तेन ] G, D, $J_2$, 16654, 326; यत्नेन A, G (text M), P, 512, 11294. विदलत्० ] G, P, D; विलसत्० A.

[58] ०लवैर् ] G, D, $J_2$, 16654; ०जलैर् A, P, 11294. स्वच्छन्दैर् ] G, D; सच्छेदैर् A, P, $J_2$, 512, 11294. नूपुरम् ] G,

स्वामिन्भङ्गुरयालकं सुतिलकं भाले विलासिन्कुरु
प्राणेश त्रुटितं पयोधरतटे हारं पुनर्योजय ।
इत्युक्त्वा सुरतावसानसुखिता संपूर्णचद्रानना
स्पृष्टा तेन तथेति जातपुलका प्राप्ता पुनर्मोहनम् ॥ १.७२ ॥[59]

मधुरवचनैः सभ्रूभङ्गैः कृताङ्गुलितर्जनै-
रलसवलितैरङ्गन्यासैर्मनोभवबन्धुभिः ।
असकृदसकृत्स्फारस्फारैरपाङ्गविलोकितै-
स्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम् ॥ १.७३ ॥[60]

निराकुला रतावेषा द्रवतीव प्रियाङ्कके ।
कोऽयं काहं रतं किं वा न वेत्ति च रसाद्यथा ॥ १.७४ ॥[61]

धन्यास्ताः सखि योषितः प्रियतमे सर्वाङ्गलग्नेऽपि याः
प्रागल्भ्यं प्रथयन्ति मोहनविधावालम्ब्य धैर्यं महत् ।
अस्माकं तु तदीयपाणिकमलेऽप्युन्मोचयत्यंशुकं
कोऽयं का वयमत्र किं च सुरतं नैव स्मृतिर्जायते ॥ १.७५ ॥[62]

---

D, 512, 11294, 16654; नौपुरम् P. सर्वविषयाः ] G, P, D; सर्वविजयाः 512. रतये ] G, D; धृतये A, P, $J_2$, 512, 11294, 16654.

[59] सुतिलकं भाले ] G, P, 11294; सतिलकं भालं D, $J_{2,}$ 512 16654; सतिलकं भाले 326; सतिलकं फालं A.

[60] मनोभव॰ ] G, P, D; मदोत्सव॰ A, Ś, V. विलोकितैस् ] A, G, D, Ś, V; विलोकनैस् P.

[61] द्रवतीव ] G (comm.) P, D; द्रवन्तीव A; द्रवन्ती च G (text). काहं ] A, P (R 12.25); कास्मि G, D. वेत्ति च रसाद् ] G, D; वेत्त्यतिरसाद् P.

[62] सर्वाङ्गलग्नेऽपि याः ] G, P, D; सर्वाङ्गलग्नाः प्रियाः A. च ] A, P; नु G, D. नैव स्मृतिर्जायते ] A, P, D; स्वल्पापि नैव स्मृतिः G.

कृतदोषेऽपि सा धीरा तस्मिन्नाद्रियते रुषा ।
आकारसंवृतिं चापि कृत्वोदास्ते रतौ यथा ॥ १.७६ ॥

यद्वाचः प्रचुरोपचारचतुरा यत्सादरं दूरतः
प्रत्युत्थानमिदं स्वहस्तनिहितं यद्भिन्नमप्यासनम् ।
उत्पश्यामि यदेवमेव च मुहुर्दृष्टिं सखीसंमुखीं
तच्छङ्के तव पङ्कजाक्षि बलवान्कोऽप्यप्रसादो मयि ॥ १.७७ ॥[63]

यत्पाणिर्न निवारितो निवसनग्रन्थिं समुद्ग्रन्थय-
न्भ्रूभेदो न कृतो मनागपि मुहुर्यत्खण्ड्यमानेऽधरे ।
यन्निःशङ्कमिवार्पितं वपुरहो पत्युः समालिङ्गने
मानिन्या कथितोऽनुकूलविधिना तेनैव मन्युर्महान् ॥ १.७८ ॥

मध्या प्रतिभिनत्त्येनं सोल्लुण्ठैः साधुभाषितैः ।
अधीरा तु रुषा हन्ति संतर्ज्य दयितं यथा ॥ १.७९ ॥[64]

कृतं मिथ्यावादैर्विरम विदितं कामुक चिरा-
त्प्रियां तामेवोच्चैरभिसर यदीयैर्नखपदैः ।
विलासैश्च प्राप्तं तव हृदि पदं रागबहुलै-
र्मया किं ते कृत्यं ध्रुवमकुटिलाचारपरया ॥ १.८० ॥[65]

सा बाढं भवतेक्षितेति निबिडं संयम्य बाह्वोः स्रजा
भूयो द्रक्ष्यसि तां शठेति परुषं संतर्ज्य संतर्ज्य च ।

---

[63] सादरं ] G, P, D; साग्रहं A.

[64] प्रतिभिनत्त्य ] G, P, D; प्रतिवदत्य A; प्रतिभणत्य ?. सोल्लुण्ठैः ] A, P (R 12.27); सोल्लुण्ठं G, D. तु रुषा ] P, $J_2$, 512, 16654, 326 (च रुषा) (R 12.27: कोपात्; DRA 2.19: कुपिता सती संतर्ज्य); परुषैर् G, D, 11294; परुषं A.

[65] विदितं ] G, P, D; विदितः A. अभि° ] G, P, D; अनु A. च ] P, D; यत् G. बहुलैर् ] G, P, D; बहुलं A.

आलीनां पुर एव निह्नुतिपरः कोपाद्रणन्नूपुरं
मानिन्या चरणप्रहारविधिना प्रेयानशोकीकृतः ॥ १.८१ ॥[66]

एकाकारा मता मुग्धा पुनर्भूश्च यतोऽनयोः ।
अतिसूक्ष्मतया भेदः कविभिर्न प्रदर्शितः ॥ १.८२ ॥[67]

मध्या पुनः प्रगल्भा च द्विविधा परिभिद्यते ।
एका ज्येष्ठा कनिष्ठान्या नायकप्रणयं प्रति ॥ १.८३ ॥

उपरोधात्तथा स्नेहात्सानुरागोऽपि नायकः ।
चेष्टते ते प्रति प्रायः कलासु कुशलो यथा ॥ १.८४ ॥[68]

त्वदक्षिणी कुवलयबुद्धिरेत्यली
रुणध्म्यहं तदिति निमील्य लोचने ।
ततो भृशं पुलकितगण्डमण्डलां
युवापरां निभृतमचुम्बदङ्गनाम् ॥ १.८५ ॥

सम्पत्तौ च विपत्तौ च मरणेऽपि न मुञ्चति ।
या स्वीया तां प्रति प्रेम जायते पुण्यकारिणः ॥ १.८६ ॥

अन्यदीया द्विधा प्रोक्ता कन्योढा चेति ते प्रिये
दर्शनाच्छ्रवणाद्वापि कामार्ते भवतो यथा ॥ १.८७ ॥

किमपि ललितैः स्निग्धैः किंचित्किमप्यतिकुञ्चितैः
किमपि वलितैः कन्दर्पेषून्हसद्भिरिवेक्षणैः ।

---

[66] परुषं ] A, G; दयितं P, D. संतर्ज्य संतर्ज्य ] A, D (R 12.27); निर्भर्त्स्य संतर्ज्य G, P.

[67] एकाकारा मता ] G, D; एकाकारमता P. न प्रदर्शितः ] G, D; नोपदर्शितः A, P.

[68] ते ] A; ताः G, $J_2$; तां P, D.

अभिमतमुखं वीक्षां चक्रे नवाङ्गनया तथा
कलनकुशलोऽप्यालीलोको यथातिविसिस्मिये ॥ १.८८ ॥[69]

निशमय्य बहिर्मनोरमस्वरमैक्षिष्ट तथापरा यथा ।
तिलमात्रकमप्यभून्न हि श्रवणेन्दीवरलोचनान्तरम् ॥ १.८९ ॥[70]

कस्याश्चित्सुभग इति श्रुतश्चिरं य-
स्तं दृष्ट्वाधिगतरतेर्निर्मीलिताक्ष्याः ।
निस्पन्दं वपुरवलोक्य सौविदल्लाः
संतेपुर्विधुरधियो निशान्तवध्वाः ॥ १.९० ॥[71]

कार्श्यजागरसंतापान्यः करोति श्रुतोऽप्यलम् ।
तमेव दुर्लभं कान्तं चेतः कस्माद्दिदृक्षसे ॥ १.९१ ॥

साक्षाच्चित्रे तथा स्वप्ने तस्य स्याद्दर्शनं त्रिधा ।
देशे काले च भङ्ग्य च श्रवणं चास्य तद्यथा ॥ १.९२ ॥[72]

सत्यं सन्ति गृहे गृहे प्रियतमा येषां भुजालिङ्गन-
व्यापारोच्छलदच्छमोहनजला जायन्त एणीदृशः ।
प्रेयान्कोऽप्यपरोऽयमत्र नियतं दृष्टेऽपि यस्मिन्वपुः
स्वेदोज्जृम्भणकम्पसाध्वसमुखैः प्राप्नोति कांचिद्दशाम् ॥ १.९३ ॥[73]

---

69 अतिकुञ्चितैः ] G, D; अभिकुञ्चितैः A, P. कलन॰ ] G; ललित॰ P, D.

70 मनोरम॰ ] P; मनोरमं G; मनोहरं D.

71 निस्पन्दं ] P, D; विस्पन्दं G.

72 भङ्ग्या ] P (R 12.31); भङ्ग्यां A, G, D. चास्य ] D, P; तस्य G.

73 नियतं ] A, G, P; सुकृती D. ऽपि ] P, D; च G.

चित्रं चित्रगतोऽप्येष ममालि मदनोपमः ।
समुन्मूल्य बलाल्लज्जामुत्कण्ठयति मानसम् ॥ १.९४ ॥

मुग्धा स्वप्नसमागते प्रियतमे तत्पाणिसंस्पर्शना-
द्रोमाञ्चाञ्चितया शरीरलतया संसूच्य कोपात्किल ।
मा मां वल्लभ संस्पृशेति सहसा शून्यं वदन्ती मुहुः
सख्या नो हसिता सचिन्तमसकृत्संशोचिता प्रत्युत ॥ १.९५ ॥[74]

स्फारस्फुरत्प्रदीपं सौधं मधु सोत्पलं कलं गीतम् ।
प्रियसखि सकलमिदं तव विफलं यदि नो भवेत्सोऽत्र ॥ १.९६ ॥[75]

विकसति कैरवनिकरे सरति च सरसीसमीरणे सुतनु ।
चुम्बत्यम्बरमिन्दौ तव तेन विना रतिः कीदृक् ॥ १.९७ ॥

अजननिरस्तु दृशोस्तव कुचयोरभवनिरलं भवतु
यदि दृश्यते न स युवा निर्भरमालिङ्ग्यते नो वा ॥ १.९८ ॥[76]

द्रष्टुं वक्तुं च नो कन्या रक्ता शक्नोत्यमुं स्फुटम् ।
पश्यन्तमभिजल्पन्तं विविक्तेऽपि ह्रिया यथा ॥ १.९९ ॥

कामं न पश्यति दिदृक्षत एव भूम्ना
नोक्तापि जल्पति विवक्षति चादरेण ।

---

[74] स्वप्नसमागते ] P, D; स्वप्न उपागते Pu (text); ∘अञ्चितया ] A, G, P; ∘अर्चितया K. मां ] G, D; मा A, P.

[75] सोत्पलं कलं गीतम् ] P, D; सोत्पलं च कलगीतम् G. विफलं यदि नो भवेत्सोऽत्र ] G, P (वसेत्); सफलं खलु यदि भवेत् A, $J_2$, D.

[76] अजननिरस्तु ... कुचयोरभवनिरलं भवतु ] G, D, $J_2$, 19852 and 16654 (दृशास्ते, so G) add मुग्धे; अञ्जननिकरस्तु ... पत्त्रभङ्गकं च वृथा P, 512.

लज्जास्मरव्यतिकरेण मनोधिनाथे
बाला रसान्तरमिदं ललितं बिभर्ति ॥ १.१०० ॥

विज्ञातनायिकाचित्ता सखी वदति नायकम् ।
नायको वा सखीं तस्याः प्रेमाभिव्यक्तये यथा ॥ १.१०१ ॥

कण्टकिततनुशरीरा लज्जामुकुलायमाननयनेयम् ।
तव कुमुदिनीव वाञ्छति नृचन्द्र बाला करस्पृशम् ॥ १.१०२ ॥[77]

संतापयन्ति शिशिरांशुरुचो यदेते
संमोहयन्ति च विनिद्रसरोजवाताः ।
यत्स्विद्यते तनुरियं च तदेष दोषः
सख्यास्तवैव सुतनु प्रचुरत्रपायाः ॥ १.१०३ ॥[78]

अपश्यन्तं च सा कान्तं स्फारिताक्षी निरीक्षते ।
दूरादालोकयत्येव सखीं स्वजति निर्भरम् ॥ १.१०४ ॥[79]

निर्निमित्तं हसन्ती च सखीं वदति किंचन ।
सव्याजं सुन्दरं किंचिद्गात्रमाविष्करोति च ॥ १.१०५ ॥[80]

सख्या प्रस्थापितां मालां काञ्च्यादि रचयेत्पुनः ।
चेष्टां च कुरुते रम्यामङ्गभङ्गैः शुभैर्यथा ॥ १.१०६ ॥[81]

---

[77] कण्टकित° ] G, P, D; अङ्कुरित° A.

[78] स्विद्यते ] G, P; खिद्यते G (v.l.), D, $J_2$, 11294, 19852; भिद्यते A.

[79] अपश्यन्तं च ] A (तु), G, D, $J_2$, 11294, 16654 (R 12.33: अवीक्षमाणम्); अपश्यन्तीव P.

[80] हसन्ती च ] G, P, D (R 12.34); हसन्तीवा A, $J_2$. गात्रम् ] G, P, D (R 12.34: अङ्गम्); भावम् A.

[81] सख्या प्रस्थापितां ] P (conj. पर्यासिताम् ? R 12.35: सख्या पर्यस्तं); सख्यादिस्थापितां G (सख्यादिगुम्फितां PS);

अभिमुखगते तस्मिन्नेव प्रिये बहुशो वद-
त्यवनतमुखं तूष्णीमेव स्थितं मृगनेत्रया ।
अथ किल चलल्लीलालोलं स एष तथेक्षितः
कथमपि यथा दृष्ट्या मन्ये कृतं श्रुतिलङ्घनम् ॥ १.१०७ ॥[82]

तिर्यग्वर्तितगात्रयष्टिविषमोद्वृत्तस्तनास्फालना-
त्त्रुट्यन्मौक्तिकमालया सपुलकस्वेदोल्लसद्गण्डया ।
दूरादेव विलोकयत्यभिमते तद्वक्रदत्तेक्षणं
दुर्वारस्मरया तया सहचरी गाढं समालिङ्गिता ॥ १.१०८ ॥[83]

[अनिमित्तं यद्विहसति निष्कारणमेव यत्सखीं वदति ।
दयितं विलोक्य तदियं शंसति तदधीनमात्मानम् ॥ १.१०९ ॥ ][84]

प्रादुष्यद्भुजमूलकान्तिललितामुद्यम्य दोर्वल्लरीं
वल्गत्पीनपयोधरस्थललुठन्मुक्तावलीसुन्दरम् ।
अङ्गुल्या प्रचलत्कलापवलयस्वानोपहूतस्मरं
तन्व्याः कुञ्चितलोचनं विजयते तत्कर्णकण्डूयनम् ॥ १.११० ॥[85]

---

सख्यादि स्थापितां [sic] D.

82 चलल्° ] A, P, $J_2$, 11294, 16654; वलल्° G, D.

83°वर्तित° ] G, P, D; °वक्रित° A. °आस्फालनात् G, P, $J_2$ (corr.), 11294 (corr.), 16654; °आस्फालन° A, D, 19852. °त्रुट्यन्° ] P, D; °नृत्यन्° G. °स्मरया तया G, P, 16654 (°स्मरसा तया); °स्मरतापया D, $J_2$, 11294 (corr.); °घातया A.

84 तदियं ] G, D, P, 11294, 16654, 19852; तदिदं $J_2$; यदियं A. [An interpolation]

85 °लिलताम् ] P, D; °लतिकाम् G. °लुठन् ] G, A, PS, 11294; °चलन् P, °लुलन् D. अङ्गुल्या प्र° ] G, D, 16654, 19852; अङ्गुल्याग्र° P. °कलाप° ] G, P, 11294, 19852; °कराग्र° D. °स्वान° ] A, G, D, 16654 19852; °ध्वान°

स्रजोऽवतंसं रशनां च किंचि-
त्प्रियं समालोक्य समासजन्ती ।
पुनस्तरां सा सुहृदो ददाति
प्रत्यङ्गमावासमिव स्मरस्य ॥ १.१११ ॥[86]

[व्याजृम्भणोल्लसितदन्तमयूखजालं
व्यालम्बिमौक्तिकगुणं रमणे मुदैव ।
ऊर्ध्वं मिलद्भुजलतावलयप्रपञ्च-
सत्तोरणं हृदि विशत्यपरा व्युदास ॥ १.११२ ॥ ][87]

अन्योढापि करोत्येतत्सर्वमुद्धतमन्मथा ।
दुरवस्था पुनः कान्तमभियुङ्क्ते स्वयं यथा ॥ १.११३ ॥[88]

उल्लङ्घ्यापि सखीवचः समुचितामुत्सृज्य लज्जामलं
हित्वा भीतिभरं निरस्य च निजं सौभाग्यगर्वं मनाक् ।
आज्ञां केवलमेव मन्मथगुरोरादाय नूनं मया
त्वं निःशेषविलासिवर्गगणनाचूडामणिः संश्रितः ॥ १.११४ ॥[89]

---

P; अङ्गुल्या प्रचुरत्करा॰ A. तन्व्याः ] G, P, D; तस्याः A. तत्कर्ण॰ ] P, D; कर्णस्य G.

[86] पुनस्तरां ] G, P, D; घनस्तनी A.

[87] जालं ] G, P; जाल॰ A, D. ॰लम्बि॰ ] A, G, D, 11294; ॰लम्ब॰ P. रमणे ] P, D: रमणं G; रमणीं (मुदेन) A. विशत्य॰ ] G, D, 19852, 11294, 16654, Ś; विशन्त्य॰ P. व्युदास ] G, D; ॰ध्युवास P, 11294, 16654, 19852; व्युदासे Ś; विशत्यपराव्यदासीत् [sic] A. [An interpolation]

[88] एतत् ] A, G, P, $J_2$, 19852 (R 12.36); एव D, 16654.

[89] हित्वा ] G, P, D; भित्त्वा 16654, 19852; *॰कृत्वा $J_2$. उत्सृज्य ] P, D; उन्मूल्य G. भीतिभरं ] G, P, K; नीतिरसं A. ॰मणिः ] A, P, 11294; ॰मणे G, D, $J_2$ (PS); ॰मणेः 16654.

चक्षुर्मीलति सानन्दं नितम्बः प्रस्रवत्यपि ।
वेपते च तनुस्तन्व्यास्तस्यास्तद्दर्शने यथा ॥ १.११५ ॥[90]

मीलन्मन्थरचक्षुषा परिपतत्काञ्चीग्रहव्यग्रया
गाढानङ्गभरस्रवज्जघनया कम्पोपरुद्धाङ्गया ।
सर्वाङ्गे चटुकारकोऽप्यबलया संकेतके कौतुका-
दास्तां रन्तुमहो निरीक्षितुमपि प्रेयान्न सम्भावितः ॥ १.११६ ॥[91]

नाभियुङ्क्ते स्वयं कन्या मुग्धत्वाद्दुःस्थितापि तम् ।
तदवस्थां तु कान्ताय तत्सखी कथयेद्यथा ॥ १.११७ ॥

निःश्वासेषु स्वलति कदली वीजने तापसम्प-
न्नेत्राम्भोभिश्छमिति पतितैः सिच्यते तत्स्तनान्तः ।
तस्याः किञ्चित्सुभग तदभूत्तानवं त्वद्वियोगा-
द्येनाकस्माद्वलयपदवीमङ्गुलीयं प्रयाति ॥ १.११८ ॥[92]

अनन्यशरणा स्वीया रतहार्या पराङ्गना ।
अस्यास्तु केवलं प्रेम तेनैषा रागिणां मता ॥ १.११९ ॥[93]

सामान्यवनिता वेश्या सा वित्तं परमिच्छति ।

---

[90] प्रस्रवत्यपि ] PS, P, D; प्रस्फुरत्यलम् G. तन्व्यास् ] P, J2, 11294; तन्वीA, D; तीव्रं G, 19852.

[91] ०स्रवज्जघनया ] P, D; ०स्वलद्रमणया G. सर्वाङ्गे ] G, J2; सर्वाङ्गं A, D, 11294; सर्वाङ्गैश् P, 19852.

[92] वीजने G; वीजनं P, D. ०भिश्छमिति ] A, ŚP (28.117), G, D; स्थगिति J2; ०भिर्झटिति P; सिच्यते ] G, D; सूच्यते A, ŚP, P, J2. तत्० ] A, G, P, J2; च ŚP, D. ०वियोगाद् ] G, P, J2; ०वियोगे A, D.

[93] रत० ] G, P; धन० J2, PS; धना० A, D. रागिणां ] P, D (PS कामिनां प्रिया); रागिणी G.

निर्गुणेऽपि न विद्वेषो न रागोऽस्या गुणिन्यपि ॥ १.१२० ॥[94]

तत्स्वरूपमिदं प्रोक्तं कैश्चिद्ब्रूमो वयं पुनः ।
बलवत्यानया युक्त्या तासामप्यनुरागिता ॥ १.१२१ ॥[95]

शृङ्गाराभास एव स्याद्यदि ता रागवर्जिताः।
तद्व्यापारोऽथवा तासां स्मरः किं भक्षितो बकैः ॥ १.१२२ ॥

तस्मात्तासामपि क्वापि रागः स्यात्किं तु सर्वथा ।
धनार्थं कृत्रिमैर्भावैर्गम्यान्व्यामोहयन्ति ताः ॥ १.१२३ ॥[96]

लिङ्गी प्रच्छन्नकामश्च नरंमन्यश्च षण्डकः ।
सुखप्राप्तधनो मूर्खः पितृवित्तेन गर्वितः ॥ १.१२४ ॥
इत्यादीन्प्रथमं गम्यान्ज्ञात्वाकृष्य च तद्धनम् ।
अपूर्वा इव मुञ्चन्ति तानेतास्तापयन्ति च ॥ १.१२५ ॥[97]

किंतु तासां कलाकेलिकुशलानां मनोरमम् ।
विस्मारितापरस्त्रीकं सुरतं जायते यथा ॥ १.१२६ ॥

गाढालिङ्गनपीडितस्तनतटं स्विद्यत्कपोलस्थलं
संदष्टाधरमुक्तसीत्कृतमभिभ्रान्तभ्रु नृत्यत्करम् ।

---

[94] वित्तं ] A, G, P, J2; द्रव्यं D, RAS. रागोऽस्या ] G, D; रागः स्याद् P; नानुरागो J2, RAS [*1.116]; see anurāgo in next v.

[95] बलवत्या ] A, G, P; वर्णयन्त्य D. ◦रागिता ] G; ◦रागिताम् P, D.

[96] गम्यान् ] conj.; ग्रम्यान् (sic; conj. गम्यान् see next v.; and 1.165) A; ग्राम्यान् G, P; ग्राम्यं D, 512.

[97] गम्यान् ] A (R 12.40: गम्यं निरूप्य); ग्राम्यान् P, D; ज्ञात्वा (समाकृष्य) G. तानेतास्तापयन्ति च ] P, D; तस्मात्तांस्तापयन्ति ताः G.

चाटुप्रायवचो विचित्रमणितं घातैर्नखैश्चाङ्कितं
वेश्यानां धृतिधाम पुष्पधनुषः प्राप्नोति धन्यो रतम् ॥ १.१२७ ॥[98]

ईर्ष्या कुलस्त्रीषु न नायकस्य निःशङ्ककेलिर्न पराङ्गनासु
वेश्यासु चैतद्द्वितयं प्ररूढं सर्वस्वमेतास्तदहो स्मरस्य ॥ १.१२८ ॥[99]

कुप्यत्पिनाकिनेत्राग्निज्वालाभस्मीकृतः पुरा ।
उज्जीवितः पुनः कामो मन्ये वेश्यावलोकितैः ॥ १.१२९ ॥[100]

आनन्दयन्ति युक्त्या ताः सेविता घ्नन्ति चान्यथा ।
दुर्विज्ञेयाः प्रकृत्यैव तस्माद्वेश्या विषोपमाः॥ १.१३० ॥

स्वाधीनपतिकोत्का च तथा वासकसज्जिका ।
संधिता विप्रलब्धा च खण्डिता चाभिसारिका ॥ १.१३१ ॥
प्रोषितप्रेयसी चोक्ता नायिकाः पूर्वसूरिभिः ।
ता एवात्र भवन्त्यष्टाववस्थाभिः पुनर्यथा ॥ १.१३२ ॥[101]

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति ।
विचित्रविभ्रमासक्ता स्वाधीनपतिका यथा॥ १.१३३ ॥

लिखति कुचयोः पत्रं कण्ठे नियोजयति स्रजं
तिलकमलिके कुर्वन्गण्डादुदस्यति कुन्तलान् ।
इति चटुशतैर्वारं वारं वपुः परितः स्पृश-

---

[98] अभि० ] A, G, D; अति० P. ०भ्रान्त० ] G, P, D: ०भ्रम्यद्० A. घातैर्नखैश्चाङ्कितं ] G, P, D; घातैः क्षतैश्चालितं A.

[99] प्ररूढं ] P, D; प्रसिद्धं G.

[100] उज्जीवितः ] A, P, D; संजीवितः G.

[101] संधिता ] G, D; अभिसंधिता PS, P. च ] G, D, J₂ (corr.); del. P. चोक्ता ] G; चैव P, D. पूर्वसूरिभिः ] G; पूर्वसूचिताः P, D.

न्विरहविधुरो नास्याः पार्श्वं विमुञ्चति वल्लभः ॥ १.१३४ ॥

उत्का भवति सा यस्याः सङ्केतं नागतः प्रियः ।
तस्यानागमने हेतुं चिन्तयन्त्याकुला यथा ॥ १.१३५ ॥

किं रुद्धः प्रियया कयाचिदथवा सख्या तयोद्वेजितः
किं वा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः ।
इत्यालोच्य मृगीदृशा करतले संस्थाप्य वक्राम्बुजं
दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः ॥ १.१३६ ॥[102]

भवेद्वासकसज्जासौ सज्जिताङ्गरतालया ।
निश्चित्यागमनं भर्तुर्द्वारिक्षणपरा यथा ॥ १.१३७ ॥

दृष्ट्वा दर्पणमण्डले निजवपुर्भूषां मनोहारिणीं
दीपार्चिःकपिशं च मोहनगृहं त्रस्यत्कुरङ्गीदृशा ।
एवं नौ सुरतं भविष्यति चिराद्द्येति सानन्दया
कामं कान्तदिदृक्षयातिललिता द्वारे दृगारोपिता ॥ १.१३८ ॥[103]

निरस्तो मन्युना कान्तो नमन्नपि यया पुनः ।
दुःस्थिता तं विना साभिसंधिताभिमता यथा ॥ १.१३९ ॥[104]

यत्पादप्रणतः प्रियः परुषया वाचा स निर्वारितो

---

[102] तयो॰ ] G, P, D; मयो॰ A.

[103] निजवपुर्॰] A, G, P, $J_2$; निजमुखं D. अतिललिता ] G; अतिललितं D, $J_2$; विलसिता P. कामं ] A, G, $J_2$, P, D; मन्दं Ś.

[104] पुनः ] A, G, D; पुरा P, $J_2$. अभिसंधिता ] G, P, $J_2$ (R 12.40 [6]); अतिसंधिता D. अभिमता ] P, D; कथिता G.

यत्सख्या न कृतं वचो जडतया यन्मन्युरेको धृतः ।
पापस्यास्य फलं तदेतदधुना यच्चन्दनेन्दुद्युति-
प्रालेयाद्रिसमीरपङ्कजबिसैर्गात्रं मुहुर्दह्यते ॥ १.१४० ॥[105]

प्रेष्य दूतीं स्वयं दत्त्वा सङ्केतं नागतः प्रियः ।
यस्यास्तेन विना दुःस्था विप्रलब्धा तु सा यथा ॥ १.१४१ ॥[106]

यत्सङ्केतगृहं प्रियेण कथितं संप्रेष्य दूतीं स्वयं
तच्छून्यं सुचिरं निषेव्य सुदृशा पश्चाच्च भग्नाशया ।
स्थानोपासनसूचनाय विगलत्सान्द्राञ्जनैरश्रुभि-
र्भूमावक्षरमालिकेव लिखिता दीर्घं रुदत्या शनैः ॥ १.१४२ ॥[107]

कुतश्चिन्नागतो यस्या उचिते वासके प्रियः ।
तदनागमसंतप्ता खण्डिता सा मता यथा ॥ १.१४३ ॥

सोत्कण्ठं रुदितं सकम्पमसकृद्ध्यातं सबाष्पं चिरं
चक्षुर्दिक्षु निवेशितं सकरुणं सख्या समं जल्पितम् ।
नागच्छत्युचितेऽपि वासकविधौ कान्ते समुद्विग्नया
तत्तत्किंचिदनुष्ठितं मृगदृशा नो यत्र वाचां गतिः ॥ १.१४४ ॥[108]

या निर्लज्जीकृता बाढं मदनेन मदेन च ।
अभियाति प्रियं साभिसारिकेति मता यथा ॥ १.१४५ ॥[109]

---

105 ०अद्रि० ] P; ०अम्बु० D, $J_2$; ०अंशु० G.

106 तु ] P, D; च G; अत्र A.

107 अश्रुभिर् ] G, P; लोचनैर् A, D. लिखिता ] A, G, D; रचिता P; निहिता $J_2$.

108 ध्यातं ] G, P, $J_2$; यातं D. वाचां गतिः ] G, P, D; वासं गतः A.

109 मदनेन मदेन च G, $J_2$ (R 12.40 [4]); मदेन मदनेन च A, P (वा); मदने [sic] मदनेन च D. इति मता ] P, D;

नो भीतं तडितो दृशा जलमुचां तद्दर्शनाकाङ्क्षया
नो गर्जिर्गणिता भृशं श्रुतिसुखं तद्वाचि संचिन्त्य च ।
धारापातसमुद्भवा न च मता पीडा तदालिङ्गनं
वाञ्छन्त्या दयिताभिसारणविधौ तन्व्या परं तत्वरे ॥ १.१४६ ॥[110]

कुतश्चित्कारणाद्यस्याः पतिर्देशान्तरं गतः ।
दत्त्वावधिं भृशार्ता सा प्रोषितप्रेयसी यथा ॥ १.१४७ ॥

उत्क्षिप्यालकमालिकां विलुलितामापाण्डुगण्डस्थला-
द्विश्लिष्यद्वलयप्रपातभयतः प्रोद्यम्य किंचित्करौ ।
द्वारस्तम्भनिषण्णगात्रलतिका केनापि पुण्यात्मना
मार्गालोकनदत्तदृष्टिरबला तत्कालमालिङ्ग्यते ॥ १.१४८ ॥

निःश्वाससंतापसखीवचोभि-
श्चिन्ताश्रुपातादियुताः सखेदाः ।
वाच्याः प्रलब्धागतभर्तृकोत्का-
भिसंधिताः खण्डितया सहात्र ॥ १.१४९ ॥[111]

विचित्रमण्डना हृष्टा भवेत्स्वाधीनभर्तृका ।

---

अभिमता G.

110 ०मुचां ] G, P; ०मुचा D. गर्गिर् ] G, D, $J_2$; गर्जिद् ] P. तद्वाचि संचिन्त्य च ] G, P, D; संचिन्त्य तद्वाचितम् A. तत्वरे ] G, P; तत्परम् D; परा ततरे [तत्वरे?] A.

111 ०भिश् G, P, $J_2$; वचोक्ति० A; ०र्ति० D. ०युताः सखेदाः ] ०युता सखेदा P, $J_2$. वाच्याः ] G, 16654, 512; वाच्या P, D; वाचा A. प्रलब्धागत० ] D; प्रलब्धा गत० P; प्रगल्भा० A, G. अभि० ] G, P; अति० A, D. ०संधिताः ] ०संधिता P, $J_2$.

तथा वासकसज्जापि सा किं त्वागन्तुकप्रिया ॥ १.१५० ॥[112]

कुलजान्याङ्गना वेश्या त्रिधा स्यादभिसारिका ।
यथैवोक्तास्तथैवान्याः स्वाधीनपतिकादयः ॥ १.१५१ ॥

कुलजा संवृता त्रस्ता सव्रीडा च द्रुतं व्रजेत् ।
नायकं परनारी तु समन्तादनवेक्षिता ॥ १.१५२ ॥[113]

सखीयुक्ता मदाधिक्यात्स्फारिताक्षी त्वशङ्किता ।
सशब्दाभरणा कामं वेश्या सरति नायकम् ॥ १.१५३ ॥[114]

त्रयोदशविधा स्वीया द्विविधा च पराङ्गना ।
एका वेश्या पुनश्चाष्टाववस्थाभेदतोऽत्र ताः ॥ १.१५४ ॥

पुनश्च तास्त्रिधा सर्वा उत्तमामध्यमाधमा: ।
इत्थं शतत्रयं तासामशीतिश्चतुरुत्तरा ॥ १.१५५ ॥[115]

दोषानुरूपकोपा यानुनीता च प्रसीदति ।
रज्यते च भृशं नाथे गुणहार्योत्तमेति सा ॥ १.१५६ ॥

कान्ते किं कुपितासि कः परजने प्राणेश कोपो भवे-
त्कोऽयं सुभ्रु परस्त्वमेव दयिते दासोऽस्मि कस्ते परः ।

---

112 ॰मण्डना ] G, P, D; ॰मण्डनैः G (comm., conj.).

113 त्रस्ता ] तत्र $J_2$. सव्रीडा ] P, D; सव्रीडं G. च द्रुतं ] A, D; तद्गृहं G, P, $J_{2J2}$. तु ] G, P, $J_2$; च D. समन्तादनवेक्षिता ] G, P, D; समदान्यैरविक्षिता A; तदन्यैरप्यनीक्षिता 19852.

114 त्वशङ्किता ] G, P, $J_2$; न शङ्किता D.

115 उत्तमाधममध्यमाः ] G, P; उत्तमा मध्यमाधमा D.

इत्युक्त्वा प्रणतः प्रियः क्षितितलादुत्थाप्य सानन्दया
नेत्राम्भःकणिकाङ्किते स्तनतटे तन्व्या समारोपितः ॥ १.१५७ ॥[116]

दोषे स्वल्पेऽपि या कोपं धत्ते कष्टेन तुष्यति ।
प्रयाति कारणाद्रागं मध्यमा सा मता यथा ॥ १.१५८ ॥[117]

प्रस्फारस्फुरिताधरापि विलसद्गण्डस्थलप्रस्खल-
द्धर्माम्भःकणिकापि भङ्गुरतरभ्रूभेदभूषाप्यलम् ।
पादान्तःप्रणते प्रिये प्रकटयत्यन्तःप्रसादं प्रिया
केशान्नूपुरमण्डलीशबलितानुन्मोचयन्ती शनैः ॥ १.१५९ ॥[118]

या कुप्यति विना दोषं स्निह्यत्यनुनयं विना ।
निर्हेतुकप्रवृत्तिश्च चलचित्तापि साधमा ॥ १.१६० ॥[119]

यत्राधःकृतकामकार्मुककथो भ्राम्यद्भ्रुवोर्विभ्रमः
सद्यःप्रोद्गतचन्द्रकान्तिजयिनी यस्मिन्कपोलच्छविः ।
यत्र स्वेदकणाविलुप्तमहिमा हारोऽप्युरोजस्थले
कोऽयं मानिनि मत्प्रणामविमुखः प्रत्यग्रमानग्रहः ॥ १.१६१ ॥[120]

---

[116] कस् ] G, D; किं A, P, $J_2$.

[117] तुष्यति ] A, P (R 12.40 [12]: प्रसीदति); मुञ्चति G, D, $J_2$, 16654, 19852, 512. कारणाद् ] G, A, P, D, 19852, 512 (R 12.40 [12]: कारणेन); करुणाद् 16654.

[118] प्र॰ ] A, G, P; वि॰ D. ॰लसद् ] A, G, P; ॰कसद् D. अन्तःप्रसादं ] P; अन्तः प्रसादं D. ॰लीशबलितान् ] G, P, $J_2$; ॰लीषु वलितान् D; ॰लीवलयितान् A.

[119] दोषं ] G, D; दोषैः A, P. ॰चित्तापि साधमा ] G (॰चित्ता तु), P, D; ॰चित्ताधमा यथा A.

[120] ॰कथो ] A, G, D; कथोद्॰ P. ॰कणाविलुप्त॰ ] A (॰कणैर्), G; ॰कणावलुप्त॰ P, D; प्रणाम॰ ] A, G, D; प्रसाद॰ P.

जातिकालवयोऽवस्थाभावकन्दर्पनायकैः ।
इतरा अप्यसङ्ख्याः स्युर्नोक्ता विस्तरभीतितः ॥ १.१६२ ॥

इत्यादि सकलं ज्ञात्वा स्वयं चालोक्य तद्विदाम् ।
कवीनां च विशेषोक्त्या ज्ञातव्याः सकला इमाः ॥ १.१६३ ॥

रोमाञ्चवेपथुस्तम्भस्वेदनेत्राम्बुविभ्रमाः ।
वाच्याः संभोगशृङ्गारे कविना नायिकाश्रिताः ॥ १.१६४ ॥[121]

सम्बन्धिमित्रद्विजराजतीक्ष्ण-
वर्णाधिकानां प्रमदा न गम्याः ।
व्यङ्गास्तथा प्रव्रजिता विभिन्न-
मन्त्राश्च धर्मार्थमनोभवज्ञैः ॥ १.१६५ ॥[122]

अनेन मार्गेण विशेषरम्यं
संभोगशृङ्गारमिमं वितन्वन् ।
भवेत्कविर्भावरसानुरक्तो
विदग्धगोष्ठीवनितामनोज्ञः ॥ १.१६६ ॥

इति श्रीरुद्रभट्टविरचिते शृङ्गारतिलकाभिधाने काव्यरसालंकारे संभोगशृङ्गारो नाम प्रथम: परिच्छेदः॥[123]

---

[121] ०भोग० ] A, G, P; ०योग० D.

[122] ०तीक्ष्ण० ] G, P, D; ०भिक्षु० A.

[123] ०रुद्रभट्ट० ], G, P [श्रीमद्], D; ०रुद्रट० A. संभोगशृङ्गारो नाम ] P, D; del. G.

## द्वितीयः परिच्छेदः

विप्रलम्भाभिधानोऽयं शृङ्गारः स्याच्चतुर्विधः ।
पूर्वानुरागो मानाख्यः प्रवासः करुणात्मकः ॥ २.१ ॥[1]

दम्पत्योर्दर्शनादेव प्ररूढगुरुरागयोः ।
ज्ञेयः पूर्वानुरागोऽयमप्राप्तौ स भवेद्यथा ॥ २.२ ॥[2]

किं चन्दनै रचय मा च मृणालशय्यां
मा मा ममालि धुनु कोमलतालवृन्तम् ।
मुञ्चाग्रहं विकचपङ्कजयोजनेषु
तत्संगमः परमपाकुरुते स्मराग्निम् ॥ २.३ ॥[3]

यत्सारैरिव पङ्कजस्य घटितं यच्चन्द्रगर्भादिव
प्रोत्कीर्णं यदनङ्गसायकशिखाभासेव संवर्धितम् ।
यत्संसिच्य सुधारसैरिव रतेरास्थानभूमीकृतं
तद्भूयोऽपि कदा सरोरुहदृशः पश्यामि तस्या मुखम् ॥ २.४ ॥

मृणालकदलीचन्द्रचन्दनाम्बुरुहादिकम् ।
तत्रानयोः स्मरातङ्कशान्तये नैव सेवितम् ॥ २.५ ॥[4]

आलोकालापसंरूढरागाकुलितचेतसोः ।
तयोर्भवेदसंप्राप्तौ दशावस्थः स्मरो यथा ॥ २.६ ॥

---

[1] Om. G. See R 14.1.

[2] प्ररूढगुरु० ] A, G, P (R 14.2: प्ररूढगुरुरागयोः); समुत्पन्नानु० D. स भवेत् ] A, G, P; च दशा D.

[3] रचय मा च ] A, P; रचयसे नु D; रचय मुञ्च G. धुनु ] A, G, P; कुरु D.

[4] ०कशान्तये ] P, D; -कं शमयेन् G.

अभिलाषोऽथ चिन्ता स्यात्स्मृतिश्च गुणकीर्तनम् ।
उद्वेगोऽथ प्रलापः स्यादुन्मादो व्याधिरेव च ॥ २.७ ॥
जडता मरणं चैव दशमं जायते ध्रुवम् ।
असंप्राप्तौ भवन्त्येतास्तयोर्दश दशा यथा ॥ २.८ ॥[5]

व्यवसायो भवेद्यत्र बाढं तत्संगमाशया ।
संकल्पाकुलचित्तत्वात्सोऽभिलाषः स्मृतो यथा ॥ २.९ ॥

प्रविशति यथा गेहेऽकस्माद्बहिश्च विचेष्टते
वदति च यथा सख्या सार्धं सहासमिवोत्सुका ।
दयितवदनालोके मन्दं यथा च चलत्यसौ
मृगदृशि तथैतस्यां शङ्के स्मरेण कृतं पदम् ॥ २.१० ॥[6]

कथं स वल्लभः प्राप्यः किं कुर्यां तस्य सिद्धये ।
कथं भवेदसौ वश्य इति चिन्ता भवेद्यथा ॥ २.११ ॥[7]

सत्यं दुर्लभ एष वल्लभतमो रागो ममास्मिन्पुनः
कोऽप्यन्योऽस्ति गुरुर्न चातिनिपुणाः सख्योऽस्य संबोधने ।
संचिन्त्येति मृगीदृशा प्रियतमे दृष्टे श्लथां मेखलां
बध्नन्त्या न गतं स्थितं न च गलद्वासो न वा संवृतम् ॥ २.१२ ॥

द्वेषो यत्रान्यकार्येषु तदेकाग्रं च मानसम् ।
श्वासैर्मनोरथैश्चापि चेष्टास्तत्स्मरणं यथा ॥ २.१३ ॥[8]

---

[5] दशमं ] A, G, D; दशमी P.

[6] इवो◦ ] G, P; इहो◦ D. यथा ] P, D; मन्दं G. शङ्के G, P; मन्ये D. तथैतस्यां ] G, D; तथा तस्यां P; तथैवास्यां A, Ś.

[7] तस्य सिद्धये ] G, D (अस्य); तस्य तुष्टये P; अस्य तुष्टये A. भवेद् ] G, P; मता D.

[8] अन्यकार्येषु ] G, P, D; अन्यदीयेषु A. तत्स्मरणं ] A, G, P; ताः स्मरणं D.

इन्दुं निन्दति पद्मकन्दकदलीतल्पं न वा मन्यते
कर्पूरं किरति प्रयाति न रतिं प्रालेयधारागृहे ।
श्वासैः केवलमेव खेदिततनुर्ध्यायत्यसौ बालिका
यत्तत्कोऽपि युवा ध्रुवं स्मरसुहृच्चेतस्यमुष्याः स्थितः ॥ २.१४ ॥[9]

सौन्दर्यहसितालापैर्नास्त्यन्यस्तत्समो युवा ।
इति वाणी भवेद्यत्र तदित्थं गुणकीर्तनम् ॥ २.१५ ॥

तद्वक्त्रं हसितेन्दुमण्डलमतिस्फारं तदालोकितं
सा वाणी जितकामकार्मुकरवा सौन्दर्यमेतस्य तत् ।
इत्थं सांप्रतमालि वल्लभतमध्यानप्रसक्तात्मन-
श्चेतश्चुम्बितकालकूटमिव मे कस्मादिदं मुह्यति ॥ २.१६ ॥[10]

यस्मिन्नम्यमरम्यं स्यान्न च हर्षाय किंचन ।
प्रद्वेषः प्राणितव्येऽपि स उद्वेगः स्मृतो यथा ॥ २.१७ ॥[11]

अग्न्यागारं कलयसि पुरश्चक्रवाकीव चन्द्रं
बद्धोत्कम्पं शिशिरमरुता दह्यसे पद्मिनीव ।
प्राणान्धत्से कथमपि बलाद्गच्छतः शल्यतुल्यां-
स्तत्केनासौ सुतनु जनितो मान्मथस्ते विकारः ॥ २.१८ ॥[12]

बम्भ्रमीति मनो यस्मिन्नत्यौत्सुक्यादितस्ततः ।

---

[9] ०कन्दकदली० A, G; ०कन्दलदली० P; ०कन्दलदलैस् D. न रतिं ] G, P, D; विरतिं A. सखि स्मरसुहृत् ] G (स्मरसखश्), P; ध्रुवं स्मरसुहृत् D.

[10] अति० ] G; ०रुचि A, P; इति D. सांप्रतम् ] G; संततम् P, D.

[11] स्यान् ] A, G, P; वा D. किं चन ] G, P; जायते D. प्रद्वेषः ] P, D; यद्वेषः G.

[12] ०आगारं A, G, P; ०आकारं D. बलाद् ] G, P; चिराद् D.

वाचः प्रियाश्रिता एव स प्रलापः स्मृतो यथा ॥ २.१९ ॥[13]

इत्थं तेन निरीक्षितं न च मयाप्येवं समालोकित-
स्तेनोक्तं सुभगेन तत्र न मया दत्तं वचो मन्दया ।
तत्सत्यं कथयालि किं स सुभगः कुप्येन्न मह्यं गत
इत्युक्त्वा सुदृशा कयापि वलितग्रीवं दृशौ स्फारिते ॥ २.२० ॥[14]

श्वासप्ररोदनोत्कम्पवसुधोल्लेखनैरपि ।
व्यापारो जायते यत्र स उन्मादः स्मृतो यथा ॥ २.२१ ॥[15]

देवीवानिमिषेक्षणा विलिखति क्षोणीं श्वसित्युच्चकैः
किंचिद्ध्यायति निश्चला च बलवद्रोमाञ्चिता कम्पते ।
रोदित्यङ्कगतां विलोक्य सुचिरं वीणामतिव्यापृता
स्वल्पैरेव दिनैरियं वरतनुः केनापि संशिक्षिता ॥ २.२२ ॥[16]

संतापवेदनाप्रायो दीर्घश्वाससमाकुलः ।
तनूकृततनुर्व्याधिरष्टमो जायते यथा ॥ २.२३ ॥[17]

तापः शोषितचन्दनोदकरसः श्वासा विकीर्णोत्पलाः

---

[13] प्रलापः ] P, D; उन्मादः G.

[14] न ] P, D; स G. न मया दत्तं वचो ] P, D: न वचो दत्तं मया G. कुप्येन्न मह्यं गत ] P; कुप्येन्न मह्यं चिरात् G; कुप्येत मह्यं चिरात् A; कुप्येत मय्युच्चकैर् D. *rethink

[15] ०प्ररोदन० ] P, D; ०प्ररोहण० G. ०कम्प० ] P, D; ०कम्पैर् G.

[16] च बलवद्० ] A, D, P (०पि); चलचलद्० G. अति० ] G, P; अपि D; इति व्याग्रतं A. ०व्यापृता ] P, D; ०व्यापृताम् G.

[17] जायते ] A, G, P; ऽयं स्मृतो D.

कर्पूराभिभवप्रचण्डपटिमा गण्डस्थले पाण्डिमा ।
म्लायद्बालमृणालनाललिता प्राप्ता तनुस्तानवं
तन्वङ्ग्याः कथितः स्मरेण गुरुणा कोऽप्येष कष्टक्रमः ॥ २.२४ ॥[18]

अकाण्डे यत्र हुंकारो दृष्टिः स्तब्धा गता स्मृतिः ।
श्वासाः समधिकाः कार्श्यं जडतेयं स्मृता यथा ॥ २.२५ ॥[19]

दृष्टिर्निश्चलतारकाधरदलं श्वासैः कृतं धूसरं
प्राप्तं वासरचन्द्रबिम्बपदवीं वक्त्रं विनष्टा स्मृतिः ।
हुंकारः परमेक एव वचनस्थाने स्थितः सांप्रतं
मन्येऽस्याः कुसुमायुधः सशिबिरः प्रत्यङ्गमावासितः ॥ २.२६ ॥[20]

उपायैर्विविधैर्नार्या यदि न स्यात्समागमः ।
कन्दर्पशरभिन्नाया मरणं जायते ततः ॥ २.२७ ॥

पुंसोऽपि हि भवन्त्येता दशावस्था मनोभवात् ।
मरणं किं त्वसौन्दर्यात्तयोः कैश्चिन्न बध्यते ॥ २.२८ ॥[21]

अन्ये तदपि बध्नन्ति प्रत्युज्जीवनकाङ्क्षया ।

---

[18] ०रसः ] P, D; ०भरः G [n.b. cited as -rasaḥ in com. on 2.91+]. श्वासा ०ओत्पलाः ] G, D; श्वासो ०ओत्पलः ] P, A [अवकीर्ण०]. ०ललिता ] P, D; ०लतिका G. कथितः ] P, D; ग्रथितः G. कष्टक्रमः ] G, P, D; कष्टः क्रमः A.

[19] स्मृता ] G, P; मता D.

[20] ०दलम् ] P, D; ०तलम् G. आवासितः ] P, D; आसङ्गतः G.

[21] बध्यते ] P, D; वर्ण्यते G.

वृत्तानुवादे तच्छस्तमुत्पाद्ये प्रायशो न हि ॥ २.२९ ॥[22]

एकस्मिन्नु मृतेऽप्यन्यो यदि जीवेत्कथंचन ।
का स्नेहगणना तत्र म्रियते चेन्न संगमः ॥ २.३० ॥[23]

पूर्वं नारी भवेद्रक्ता पुमान्पश्चात्तदिङ्गितैः ।
ततः संभोगलीलेति स्वभावसुभगा स्थितिः ॥ २.३१ ॥

अन्यथापि न दोषः स्याद्यदि प्रेम समं द्वयोः ।
रक्तापरक्तवृत्तिश्चेच्छृङ्गाराभास एव सः ॥ २.३२ ॥[24]

अयं च प्रायशस्तज्ज्ञैरित्थं हास्येषु बध्यते ।
निर्धनेन मया सार्धं वेश्ये मानय यौवनम् ॥ २.३३ ॥[25]

अनुरक्तो भवेद्यस्यां नायकस्तत्सखीजनम् ।
साम्ना मानेन दानेन बाढमावर्जयत्यसौ ॥ २.३४ ॥

तस्याग्रे तत्कथां कुर्वन्स्वाभिप्रायं प्रकाशयेत् ।
तदभावे नियुञ्जीत काश्चित्प्रव्रजितादिकाः ॥ २.३५ ॥[26]

---

[22] ०काङ्क्षया ] P, D; ०वाञ्छया G.

[23] नु ] G; तु P, D.

[24] ०रक्तवृत्तिश् ] G, P; ०रक्ता वृत्तिश् D.

[25] हास्येषु बध्यते ] A, G, D; हास्यो निबध्यते P. निर्धनेन ] G, P; निर्द्रव्येण D.

[26] प्रकाशयेत् ] P, D; च काशयेत् G. नि० ] A, G, P; प्र० D. काश्चित्प्रव्रजिकादिकाः ] G, D; कांचित्प्रव्रजितादिकाम् A, P (R 14.7-8: प्रकाशयति … प्रव्रजिता … नियुङ्क्ते).

तद्द्वारेण समाख्यातस्वभावो ज्ञाततन्मनाः ।
उपचारैः परैर्लेखैः साधयेत्तामतन्द्रितः ॥ २.३६ ॥[27]

ततो दृष्ट्वा विविक्ते तामिन्द्रजालकलादिभिः ।
प्रयोगैर्ललितैः स्वैरं विस्मयं परमं नयेत् ॥ २.३७ ॥

धात्रीसखीवेश्मनि रात्रिचारे
महोत्सवे तीव्रभये वने च ।
आमन्त्रणे व्याधिमिषेण शून्ये
गृहे तयोर्नूतनसंगमः स्यात् ॥ २.३८ ॥[28]

यदा रागो गुरुः सा च लभ्यते नैव याचिता ।
क्षीणोपायस्तदा कन्यां नायकः साधयेदिति ॥ २.३९ ॥[29]

परस्त्रीगमनोपायः कविभिर्नोपदर्शितः ।
सुन्दरं किंतु काव्याङ्गमेतत्तेन निदर्श्यते ॥ २.४० ॥[30]

वामता दुर्लभत्वं च स्त्रीणां या च निवारणा ।
तदेव पञ्चबाणस्य मन्ये परममायुधम् ॥ २.४१ ॥[31]

बहुमानाद्भयाद्वापि नृणामन्यत्र योषिति ।

---

[27] उपचारैः परैर् ] D; उपचारपरैर् G, P; उपचारपदैर् A (R 14.9: उपचारैः स्वावस्थसूचकैर्लेखैः).

[28] तीव्रभये वने ] A, G, P; तीव्रतमे भये D. आमन्त्रणे ] A, G (com.); निमन्त्रणे G (text), P, D.

[29] कन्यां ] A, D (R 14.11); ह्यन्यां G, P.

[30] ॰दर्शितः ] A, G, P; ॰दिश्यते D (R 14.12: नाप्युपदेष्टव्यः). एतत्तेन निदर्श्यते ] A, G, D; इति मत्वा निगद्यते P.

[31] एव ] G, D; एवं P. मन्ये परमम् ] G, D; ऽहं परम् P.

प्रच्छन्नकामितं रम्यं सतामपि भवेद्यथा ॥ २.४२ ॥[32]

जीर्णं तार्णकुटीरकं निवसनं तल्पीकृतं स्थण्डिले
नीरन्ध्रं तिमिरं किरन्ति सलिलं गर्जन्त एते घनाः ।
गच्छामीति वदत्यसावपि मुहुः शङ्काकुला केवलं
चेतश्चित्रमहो तथापि रमते संकेतके कामिनाम् ॥ २.४३ ॥

स मानो नायिका यस्मिन्नीर्ष्यया नायकं प्रति ।
धत्ते विकारमन्यस्त्रीसङ्गदोषवशाद्यथा ॥ २.४४ ॥

किंचिद्बाष्पजलावलेपललिते नेत्रे मनाक्कुञ्चिते
रागो विस्फुरणानुबन्धरुचिरः संदर्शितो गण्डयोः ।
कम्पश्चाधरपल्लवे विरचितः कामं कुरङ्गीदृशा
नो जाने किमयं प्रिये प्रकटितः कोपोऽभिलाषोऽथवा ॥ २.४५ ॥[33]

स प्रायशो भवेत्त्रेधा कामिनीनां प्रियं प्रति ।
अवेक्ष्य दोषमेतस्य गरीयान्मध्यमो लघुः ॥ २.४६ ॥

प्रतिनार्यां गते कान्ते स्वयं दृष्टे नखाङ्किते ।
तद्वासोदर्शने गोत्रस्खलिते च गुरुर्यथा ॥ २.४७ ॥

बिम्बोष्ठः स्फुरति प्रयाति पटुतां गण्डस्थले शोणिमा
यातस्तिर्यगमू दृशौ च बलवद्भ्रूयुग्ममुद्भ्राम्यति ।
इत्थं चण्डि तथा तवैष रुचिरः कोपक्रमो जृम्भते

---

[32] नृणाम् ] G, P, D; स्त्रीणां A. प्रच्छन्नकामितं रम्यम् ] G, $J_2$ (in margin), D; प्रच्छन्नकामिता रम्या A, P, D.

सताम् ] A, P, D; तासाम् G, $J_2$ (in margin).

[33] ॰लेप॰ ] G, D; ॰लेश॰ P. मनाक् ] A, G, P; समा॰ D. ॰ललिते ] G, P, D; ॰लुलिते A.

जातोऽहं प्रणतीरपास्य सुतरामेतद्दिदृक्षुर्यथा ॥ २.४८ ॥[34]

दृष्टे प्रियतमे रागादन्यया सह जल्पति ।
सख्याख्यातेऽथवा दोषे मानोऽयं मध्यमो यथा ॥ २.४९ ॥

वाचो वाग्मिनि किं तवाद्य परुषाः सुभ्रु भ्रुवोर्विभ्रमो
ऽप्युद्भ्रान्तः कुत एव लोलनयने किं लोहिते लोचने ।
नास्त्यागो मयि किं मुधैव कुपितेत्युक्ते पुरः प्रेयसा
मानिन्या जलबिन्दुदन्तुरपटा दृष्टिः सखीष्वाहिता ॥ २.५० ॥[35]

सविलासं स्फुरच्चक्षुर्वीक्षमाणेऽपरां प्रिये ।
किंचिदन्यमनस्के च जायते स लघुर्यथा ॥ २.५१ ॥[36]

मामेव ताडय नितम्बिनि यद्यकस्मा-
त्कोपो भवेन्न च मुखं तु निजं किमेतत् ।
आनीयते शशधरानुकृतिं कपोल-
पाली प्लुतेन घनकज्जलनेत्रवारा ॥ २.५२ ॥[37]

देशकालबलात्कोपः प्रायः सर्वोऽपि योषिताम् ।

---

[34] यातस् ] P, D; याते G. ऽहं ] A, G, P; ऽयं D. अपास्य ] G, P, D; उपास्य G (v.l.).

[35] विभ्रमो ] G, P, D; विभ्रमैर् Ś. ऽप्युद्भ्रान्तः ] P, D; भ्राम्यन् G; विश्रान्तं Ś. कुत एव ] P, D; किं तव एष G; कुत एषA. For cd, Ś reads स्वेदः किं नु घनस्तनि स्तनतटे मुक्ताफलानां तुलां ।

धत्ते मुञ्च रुषं ममात्र दयिते लेशोऽपि नास्त्यागसः ॥

[36] सविलास॰ ] G, P; सविलासं D. परां ] G, D; ऽपरां P. च ] A, G, P; ॰मनस्केव D.

[37] न च ] G; तव P, D. ॰पाली प्लुतेन ] G; ॰पालीप्लुतेन P, D.

जायते सुखसाध्योऽयं कृच्छ्रसाध्योऽपि कामिभिः ॥ २.५३ ॥[38]

प्रज्वलितोज्ज्वलदीपं रतिगृहमिन्दूज्ज्वलं च सौधतलम् ।
मधुमधुरीकृतमधुकरमधुरध्वनिबोधितं च वनम् ॥ २.५४ ॥[39]

इत्यादिषु प्रदेशेषु मानिनीनामसंशयम् ।
मन्युर्गुरुतरोऽप्याशु सुखसाध्यो भवेद्यथा ॥ २.५५ ॥[40]

दृष्ट्वा चन्द्रमसं मनोभववधूकेलिक्रियाकन्दुकं
प्रोन्मीलन्नवमालतीपरिमलं चाघ्राय मानौषधम् ।
दीपार्चिःकपिशां विविक्तवलभीमालोक्य लोलदृशा
मानिन्या चटुमात्राकेण रमणे मानो मनाङ्मन्दितः ॥ २.५६ ॥[41]

मधुसमयशशधरोदयकन्दर्पमहादिकेषु कालेषु ।
मानो मनस्विनीनामतिसुखसाध्यो भवेद्भूम्ना ॥ २.५७ ॥[42]

चन्द्रश्चन्द्रमुखीक्ष्यतां क्षणमियं संभाव्यतां मञ्जरी
चूतस्य स्मरविद्विषि प्रियतमे कोपेऽपि केयं रतिः।
इत्युक्ते सुचिरेण तत्करतलं पादाग्रसंवाहना-

---

[38] प्रायः सर्वोऽपि ] A, G; प्रायः सद्योऽपि P; प्रायशः सर्व॰ D, $J_2$. ॰साध्योऽपि ] G, P; ॰साध्यश्च A, D. कामिभिः ] P, D; कामिनाम् G.

[39] ॰मधुरी॰ ] G, P; ॰विधुरी॰ A, D. च वनम् ] P; विपिनम् G; च कमलवनम् D.

[40] मानिनीनाम् ] P, D; कामिनीनाम् G.

[41] विविक्त॰ ] P, D; विचित्र॰ G. चटु॰ ] G, P, D; नत॰ A. मन्दितः ] P, D; वन्दितः G.

[42] ॰महा॰ ] G, P (R 14.20: स्मरमहोदयः); ॰मदा॰ D.

द्धुन्वन्त्याः सुदृशो बलात्पुलकिते जङ्घे च दोर्वल्लरी ॥ २.५८ ॥[43]

दूतीजनस्य पुरतो लघुरपि कोपो गुरूयते प्रायः ।
अभिनवदोषावसारे तथैव वनिताजनस्य यथा ॥ २.५९ ॥[44]

चरणपतनात्पत्युर्मन्यौ मनाक्शिथिलीकृते
भजति च किमप्युत्कम्पत्वं घनस्तनमण्डले ।
तदपि विसरत्सारङ्गाक्ष्या चिरानुनयेच्छया
कथमपि पुरो दृष्ट्वा दूतीं पुनर्भृकुटी कृता ॥ २.६० ॥[45]

चतुरचटुभिर्गाढाश्लेषैर्हठात्परिचुम्बनै-
र्मधुरवचनैर्वारं वारं गतोऽप्यतिमन्दताम् ।
अपरवनितासङ्गाल्लग्नं विलोक्य विलेपनं
कुवलयदृशः कोपः कान्ते पुनर्नवतां गतः ॥ २.६१ ॥[46]

साम दानं च भेदः स्यादुपेक्षा प्रणतिस्तथा ।
तथा प्रसङ्गविभ्रंशो दण्डः शृङ्गारहा ननु ॥ २.६२ ॥[47]

---

[43] उक्ते ] G, P, D; उक्तौ $J_2$. सुचिरेण ] P, $J_2$; दयितेन A; रुचिरेण G; रुचिरेऽपि D. ॰वाहनाद् ] G, P; ॰वाहने D, 11294, $J_2$.

[44] कोपो ] A, G, P; दोषो D.

[45] भजति ] G; त्यजति P, D. विसरत्॰ ] A, G, D, 16654, $J_2$; विलसत्॰ P. चिर॰ ] G, D, 16654, $J_2$; प्रिय॰ A, P, 11294. भृकुटी ] P; भ्रुकुटी G, D.

[46] ॰चटुभिर् G, P, $J_2$; ॰वचनैर् D, 11294. मधुरवचनैर् ] G, P, $J_2$; अलकवलनैर् D, 11294.

[47] ॰विभ्रंशो A, G, P, $J_{2J2}$, 512, 16654; ॰विध्वंसो D; 11294 (Keshav). शृङ्गारहा ननु ] A, $J_2$; शृङ्गारहा न तु P; शृङ्गारहानिकृत् G, 512, 11294; शृङ्गारहानये D, 16654, 19852 (R 14.27: दण्डस्त्विह हन्ति शृङ्गारम्).

तस्याः प्रसादने सद्भिरुपायाः षट् प्रकीर्तिताः ।
सुन्दरास्ते निदर्श्यन्ते सहोदाहृतिभिर्यथा ॥ २.६३ ॥[48]

दुर्विविनीतोऽपि पाल्योऽहं त्वया सुभ्रु क्षमाभृता ।
इति वाणी भवेद्यत्र तत्सामेति निगद्यते ॥ २.६४ ॥[49]

सत्यं भामिनि दुर्जनोऽस्मि दयिते पाल्यस्तथापि त्वया
यो दोषः स लघुर्मृगाक्षि नियतं दीनस्य मे क्षम्यताम् ।
इत्थं जल्पति वल्लभे मृगदृशा चक्षुर्जलं संवृतं
रक्तत्वं विरलीकृतं च वदने दत्तं च किंचिद्वचः ॥ २.६५ ॥

अलंकारादिकं दद्यान्नायको यत्र तुष्टये ।
उद्दिश्य कारणं किंचिद्दानं लुब्धासु तद्यथा ॥ २.६६ ॥[50]

प्रणयिना निजहारलतां स्वयं किल तवेति निवेश्य कुचस्थले।
पुलकभाजि पुरा कुपिताप्यसौ कृतकचग्रहणं परिचुम्बिता ॥ २.६७ ॥[51]

यस्मिन्परिजनं तस्याः समावर्ज्य प्रसादितम् ।
तेनैव लभते कान्तां कान्तो भेदः स उच्यते ॥ २.६८ ॥[52]

धुन्वाना करपल्लवं विदधती दृष्टिं रुषा रागिणीं

---

[48] Omitted in G.

[49] दुर्वि◦ ] A, G, P (R 14.28: दुर्जनः, compare ŚT 2.65); अवि◦ D. वाणी ] A, G, D: वाक्यं P.

[50] लुब्धासु ] D (R 14.29: [तद्दानं साधु] लुब्धासु); तत्स्याच्च G, P, $J_2$.

[51] तवेति ] G, P, $J_2$; नवेति D. ◦स्थले ] P, D; ◦द्वये G.

[52] ◦जनं ] A, G, D, $J_2$; ◦जने P (R 14.30: परिजनमाराध्य). प्रसादितम् G, P, $J_2$; प्रसादिताम् A; प्रसादतः D.

कान्तो ] G, P; कान्ता◦ D; कान्तः कान्तां $J_2$.

तन्वाना वचनानि निष्ठुरतरं मागाः शठेत्थं मुहुः ।
दूरादायति भीतिमत्यभिमते स्वैरं स्वसंज्ञाकृता
पूर्वावर्जितया चकोरनयना सख्यैव संबोधिता ॥ २.६९ ॥[53]

प्रसादनविधिं त्यक्त्वा वाक्यैरन्यार्थसूचकैः ।
यस्मिन्प्रसाद्यते योषिदुपेक्षा सा मता यथा ॥ २.७० ॥[54]

एतत्किं ननु कर्णभूषणमयं हारः स काञ्ची नवा-
बद्धा काचिदियं त्वयाद्य तिलकः श्लाघ्यः प्रिये कल्पितः ।
प्रत्यङ्गं स्पृशतेति तत्क्षणभवद्रोमाञ्चमालाञ्चिता
तन्वी मानमुपेक्षयैव शनकैर्धूर्तेन संमोचिता ॥ २.७१ ॥[55]

केवलं दैन्यमालम्ब्य पादपातो नतिर्मता ।
अभीष्टा सा भृशं स्त्रीणां ललिता च भवेद्यथा ॥ २.७२ ॥[56]

कुङ्कुमार्द्रकुचकुम्भबिम्बितं वीक्ष्य पृष्ठमपराङ्गनाश्रयम् ।
शंसदूनरसमप्यसौ मुदं प्राप पादपतितस्य कामिनः ॥ २.७३ ॥[57]

अकस्माज्जायते यत्र भयहर्षादिभावना ।

---

[53] आयति] A, G; आयति◦ D; ◦आगत◦ P.  मागाः ] P (PS 3.69: मात्रागाः); मा गाः G (?), D.

[54] यस्मिन् ] G (text, M), P, D; यस्यां G (comm.).

[55] स ] G, D; सु◦ P. आबद्धा ] G; बद्धा P, D. इयं ] G, P, D, $J_2$; अयं A [known to P]. ◦मालाञ्चिता ] P, D; आलम्बिनी G.

[56] पादपातो ] G, P; पादपातान् D.

[57] ◦बिम्बितं ] A (◦कुचबिम्बबिम्बितं) G, P; ◦लिङ्गितं D, $J_2$. अपर◦ ] A, G, D; इतर◦ P. ◦कुचबिंबितं A. अप्यसौ ] G; आशु सा P, D. पादपतितस्य ] G, P, D: पादपततोऽस्य A.

सोऽयं प्रसङ्गविभ्रंशः कोपभ्रंशात्मको यथा ॥ २.७४ ॥[58]

कथं ममोरसि कृतपक्षनिःस्वनः
शिलीमुखोऽपतदिति जल्पति प्रिये ।
निवृत्य किमिदमिति ब्रुवाणया
ससाध्वसं कुपितममोचि कान्तया ॥ २.७५ ॥[59]

यथोत्तरं बलीयांस इत्युपायाः प्रसादने ।
आद्यास्त्रयो घनं कार्या विदग्धैः पश्चिमाः क्वचित् ॥ २.७६ ॥[60]

नातिखेदयितव्योऽयं प्रियः प्रमदया क्वचित् ।
मानश्च विरलः कार्यः प्रणयोत्सवसिद्धये ॥ २.७७ ॥[61]

इत्युपायान्प्रयुञ्जीत नायिकापि प्रियं प्रति ।
कुलजा नेर्ष्यते किं तु तत्रान्यत्कारणं भवेत् ॥ २.७८ ॥[62]

स्नेहं विना भयं न स्यान्नेर्ष्या च प्रणयं विना ।
तस्मान्मानप्रकारोऽयं द्वयोः प्रेमप्रकाशकः ॥ २.७९ ॥[63]

---

58 ०विभ्रंशः ] G, P; ०विध्वंसः D; कोपभ्रंशो मतो यथा A

59 ऽलगद् ] G; ऽपतद् P, D. निवृत्य ] P, D; विवृत्य G. किं किमिदमिति ब्रुवाणया ] A, G, D; किमिति ब्रुवाणयानया P; किमिति तया ब्रुवाणया 11192. कुमपितममोचि ] A, P; कुपितमलोकि D; प्रथितमलोकि G.

60 घनम् ] P, D; सदा G.

61 प्रणयोत्सवसिद्धये ] G; प्रणामोत्सवलब्धये A, $J_2$, P; प्रणामोत्सवसिद्धये D.

62 कुलजा नेर्ष्यते किं तु ] A [नेष्यते], G, D, 512, 16654; क्रुद्धं नोपेक्षते किं चित् P, 11192.

63 नेर्ष्या च प्रणयं विना ] G (so UNM 15.78); मन्मथो नेर्ष्यया विना P, D. प्रेमप्रकाशकः ] G; प्रीतिप्रकाशकः A;

प्रियसुभगनाथवल्लभरुचिरस्वामीशकान्तचन्द्रमुखाः ।
दयितमनोरमरमणीजीवित इत्यादि नाम स्यात् ॥ २.८० ॥[64]
प्रीतौ भर्तरि सुदृशामप्रीतौ पुनरमूनि शठधृष्टौ ।
निर्लज्जदुराचारौ निष्ठुरदुःशीलनामानि ॥ २.८१ ॥[65]

गर्वाद्व्यसनात्त्यागाद्विप्रियकरणाच्च निष्ठुराद्वचनात् ।
लोभादतिप्रवासात्स्त्रीणां द्वेष्यः प्रियो भवति ॥ २.८२ ॥[66]

परदेशं व्रजेद्यस्मिन्कुतश्चित्कारणात्प्रियः ।
स प्रवास इति ख्यातः कष्टावस्थो द्वयोरपि ॥ २.८३ ॥[67]

दृष्टं केतकधूलिधूसरमिदं व्योम क्रमाद्वीक्षिताः
कच्छान्ताश्च शिलीन्ध्रकन्दलभृतः सोढाः कदम्बानिलाः ।
सख्यः संवृणुताश्रु मुञ्चत भयं कस्मान्मुधैवाकुला
एतानप्यधुनातिवज्रघटिता नूनं सहिष्ये घनान् ॥ २.८४ ॥[68]

---

प्रीतिप्रवर्धनः, P, D.

64 ◦नाथवल्लभरुचिर◦ ] P; ◦दयितवल्लभनाथ◦ D; ◦रुचिरवल्लभनाथ◦ G. ◦स्वामीश◦ ] P, D; ◦स्वामिन्नीश◦ G.

◦जीवित ] A, G, D; ◦जीविता P.

65 ◦नामानि ] G, P; ◦वानादि D.

66 व्यसनात्त्यागाद् ] G, P; व्यसनत्यागाद् G (Ch ms. व्यसनत्यागादिति पाठे व्यसनस्य क्रीडायास्त्यागात्), D, $J_2$, 512, 16654; व्यसनात्यागाद् 11192, 19852. निष्ठुराद्वचनात् ] G, P; निष्ठुरालापात् D. अति◦ ] A, G, P, D; अपि $J_2$, 435.

67 व्रजेद्यस्मिन् ] P, D; वसेद्यत्र G (Pu). ◦अवस्थो ] G, P, D; ◦अवस्था A.

68 कच्छा◦ ] G, D; कक्षा◦ P. अति◦ ] A, G, P; अपि D; अस्मि Ś.

कामं कर्णकटुः कृतोऽपि मधुरः केकारवः केकिनां
मेघाश्चामृतवर्षिणोऽपि विहिताः प्रायो विषस्यन्दिनः ।
उन्मीलन्नवकन्दलावनिरसौ शंस्याप्यशंस्यायते
तत्किं यद्विपरीतमत्र न कृतं तस्या वियोगेन मे ॥ २.८५ ॥[69]

कार्श्यजागरमालिन्यचिन्ताद्या तत्र जायते ।
अवस्था विविधा स्त्रीणां मृत्युश्चेदवधेः परम् ॥ २.८६ ॥[70]

अद्यैव यत्प्रतिपदुद्गतचन्द्रलेखा-
सख्यं त्वया तनुरियं गमिता वराक्याः ।
कान्ते गते कुसुमसायक तत्प्रभाते
बाणावलिं कथय कुत्र विमोक्ष्यसि त्वम् ॥ २.८७ ॥[71]

निःश्वासैः सह सांप्रतं सखि गता वृद्धिं ध्रुवं रात्रयः
सार्धं लोचनवारिणा विगलितं यत्प्राक्तनं मे सुखम् ।
प्राणाशा तनुतामुपैति च मुहुर्नूनं तनुस्पर्धया
कन्दर्पः परमेक एव विजयी यातेऽपि कान्ते स्थितः ॥ २.८८ ॥[72]

---

[69] ऽपि ] G; ऽति॰ P, D. ॰वर्षिणो ] G; धारिणो P, D. अवनिर् ] G; आवलिर् P, D. शंस्याप्यशंस्यायते ] G; सह्याप्यसह्यायते ] A, D, 11294; शय्यापि सर्पायते P; शय्याप्यसह्यायते 512 [ J2 in margin: सर्पौवशेषायते [sic] conj. शय्याप्यशय्यायते welcoming for sleeping but acting as though not a bed?

[70] ॰चिन्ताद्या ] G, 16654, 19852; ॰चिन्ता वै J2 , P; ॰चिन्ताद्यं, D; ॰चिन्ताद्यै [sic] A. अवस्था A, G, P, D, 11294, 16654, 19852; अवधौ J2, 435, 512. विविधा ] G, P; विविधाःD. चेद् ] A, D, 11294; स्याद् P; चाप्य् J2, 16654; चेत् 512. परम् ] P, 512; परः A, D, 11294; अवधिः पुरः 16654.; च दशमो यथा G.

[71] सख्यं ] P, D; साम्यं G. तनुरियं ] A, G, P ; वपुरिदं D. कुसुमसायक तत्॰ ] G, P, D; कुसुमचाप हत॰ J2, 435; कुसुमसायक त्वं 16654.

[72] यत्प्राक्तनं मे सुखम् ] A [तत्], G, D; तत्प्रक्वणत्कङ्कणम् P; यत्प्राक्तनैः कङ्कणैः J2, 435, 11294.

नीरागोऽधरपल्लवोऽतिमलिना वेणी दृशौ नाञ्जिते
व्यालम्बालकमालिका धवलतामालम्बतेऽङ्गच्छविः ।
इत्थं सुभ्रु विसंस्थुलापि विरहव्यापद्विषादादियं
सख्येव स्थिरशोभया दृढतरं प्रत्यङ्गमालिङ्ग्यते ॥ २.८९ ॥[73]

किं तत्र नास्ति रजनी किं वा चन्द्रो न किं त्वसावरुचिः ।
येन सखि वल्लभामपि न स्मरति स मां विदेशरुचिः ॥ २.९० ॥[74]

प्रसर शिशिरामोदं कौन्दं समीर समीरय
प्रकटय शशिन्नाशाः कामं मनोभव जृम्भताम् ।
अवधिदिवसः पूर्णः सख्यो विमुञ्चत तत्कथां
हृदयमधुना किंचित्कर्तुं ममान्यदिहेच्छति ॥ २.९१ ॥[75]

इत्यादिविरहावस्थाः पुंसोऽपि हि भवन्ति ताः ।
कन्दर्पशरघाताद्या मा भूवन्वैरिणामपि ॥ २.९२ ॥[76]

यत्रैकस्मिन्मृतेऽप्यन्यो मृतकल्पोऽपि तद्गतम् ।
किमपि प्रलपेत्प्रेम्णा करुणोऽसौ स्मृतो यथा ॥ २.९३ ॥[77]

---

[73] व्यालम्बालकमालिका ] A, G, P; म्लायद्बालमृणालिका॰ D. ॰विषादाद् ] G; ॰विमर्दाद् P, D. सख्येव ] $J_2$, 435, G, D; सख्यैव A, P. दृढतरं ] G, P, D; सहचरी $J_2$, 435. ॰आलिङ्ग्यते ] G, P; ॰आलिङ्गिता D.

[74] चन्द्रो न किं त्वसावरुचिः ] G; न तत्र सौधरुचिः P; न सुष्ठुरुचिः D.

[75] आमोदं कौन्दं ] G, D; आमोदक्षोदं P. मनोभव जृम्भताम् ] A, GB; मनोभव जृम्भ्यताम् ] P, D; मनोज समुल्लस Ś.

[76] ॰घाता॰ ] A, P; ॰पाता॰ G, D.

[77] मृतेऽप्यन्यो ] G, P; विपन्नेऽन्यो A, G (text M), D. ऽपि ] G, D; ऽथ P. तद्गतम् G (text M), D (R 14.34); तद्गतः G, P. किमपि ] G, D; नायकः G (text M), P, D. स्मृतो ] P, D; मतो G.

दग्धा स्निग्धवधूविलासकदली वीणा समुन्मूलिता
पीता पञ्चमकाकली कवलिता शीतद्युतेः कौमुदी ।
प्लुष्टः स्पष्टमनेकरत्ननिवचयो नाहं रतिः केवलं
कन्दर्पं हरता हरेण भुवनं निःसारमेतत्कृतम् ॥ २.९४ ॥[78]

वक्त्रं चन्द्रमसा दृशौ मृगगणैः केशाः कलापिव्रजै-
र्मातङ्गैः स्तनमण्डलं भुजलतोल्लासश्चलत्पल्लवैः ।
सौगन्ध्यं मलयानिलेन बलिना तन्वी विभज्येति सा
सर्वैर्निष्करुणैर्हृता ध्रुवमहो दैवेन नैकेन मे ॥ २.९५ ॥[79]

इयतीं सुभगावस्थां गतोऽसि यस्याः कृते स्मरातङ्कात् ।
मूर्छां हरामि सा तव गतपुण्या नयनसलिलेन ॥ २.९६ ॥[80]

पाशो विपाशित उपाहित एष सान्द्रः
कर्पूररेणुरुपगूढमुरो नताङ्गि ।
पापेन येन गमितेति दशाममुष्मि-
न्मूर्छाविरामललितं मयि धेहि चक्षुः ॥ २.९७ ॥[81]

ग्लानो मुक्ताश्रुरुद्विग्नः स्रस्ताङ्गो मुक्तचेतनः ।

---

[78] वीणा ] A, G, P, Ś; वाणी D. प्लुष्टः ०निवचयो नाहं रतिः ] G, P, D; प्लुष्टाः ०निवहा नालं रतेः Ś. दहता ] G, P; हरता G (text M), D, Ś.

[79] भुजलतोल्लासश्चलत्पल्लवैः ] A [०चलन्मञ्चकैः sic], G, P; भुजयुगोल्लासो मृणालैरपि D. तन्वी ] G, P, D; पत्नी A. हृता ध्रुवम् ] A, G, D; हृताहृतम् P. नैकेन ] A, G; किंचिन्न P, D.

[80] सा ] P, D; तां G.

[81] उपाहित ] P, D; उपासित G. इति ] G, D; आसि P. अमुष्मिन् ] A, D; अमुष्याम् P; इमां त्वं G (text Pu)

सचिन्तो दैन्यभागस्मिन्नेवंप्रायो जनो भवेत् ॥ २.९८ ॥[82]

केषांचित्करुणभ्रान्तिः कारुण्यादत्र जायते ।
एतस्य मिथुनावस्थां विस्मृत्य रतिमूलजाम् ॥ २.९९ ॥[83]

स्त्रीपुंसयोर्भवेदेष सापेक्षः संगमे पुनः ।
शृङ्गारवचनप्रायः करुणः स्यात्स चान्यथा ॥ २.१०० ॥[84]

तस्माच्छृङ्गार एवायं करुणेनानुमोदितः ।
सौन्दर्यं सुतरां धत्ते निबद्धो विरलं बुधैः ॥ २.१०१ ॥

कारुर्दासी नटी धात्री प्रातिवेश्या च शिल्पिनी ।
बाला प्रव्रजिता चेति स्त्रीणां ज्ञेयः सखीजनः ॥ २.१०२ ॥[85]

कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ।
माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः ॥ २.१०३ ॥

विनोदो मण्डनं शिक्षोपालम्भोऽथ प्रसादनम् ।
संगमो विरहाश्वासः सखीकर्मेति तद्यथा ॥ २.१०४ ॥

मया कोऽयं मुग्धे कथय लिखितः सत्वरसखी-
वचः श्रुत्वेत्युच्चैर्विनिहितदृशा चित्रफलके ।
न वक्तुं तन्वङ्ग्या शकितमथ चोद्दामविदल-

---

[82] ग्लानो A, D (R 14.35); म्लानो G, P. मुक्तचेतनः ] G, D; नष्टचेतनः A, P (R 14.35: विचेतनो).

[83] करुण॰ ] A, G, D; करुणा॰ P.  अत्र ] P, D; इह A, G.

[84] सापेक्षः ] P, D; सापेक्षे G. सङ्गसंगमे ] G, D; संगमः P. ॰वचन॰ ] P, D; ॰रचना॰ G.

[85] प्रातिवेश्या ] G, D; प्रतिवेश्या A, P.

त्कदम्बाकारेण प्रिय इति समाख्यायि वपुषा ॥ २.१०५ ॥[86]

प्रत्यङ्गं प्रतिकर्म नर्मपरया कृत्वाधिरूढस्मरा-
दौत्सुक्यं प्रविलोक्य मोहनविधौ चातुर्यमस्याः पुनः ।
सख्या यावकमण्डनं न रचितं पादे कुरङ्गीदृशः
सस्मेरं विशदच्छदेऽधिशयने दृष्टिः समारोपिता ॥ २.१०६ ॥[87]

नीरन्ध्रं परिरभ्यते प्रियतमो भूयस्तरां चुम्ब्यते
तद्गाढं क्रियते यदस्य रुचिरं चाटूच्चकैस्तन्यते ।
सख्या मुग्धवधूरियं रतिविधौ यत्नेन संशिक्षिता
निर्भ्रान्तं गुरुणा पुनः शतगुणं पुष्पेषुणा कारिता ॥ २.१०७ ॥[88]

सुभग भवता हृद्ये तस्या ज्वलत्स्मरपावके
ऽप्यभिनिवसता प्रेमाधिक्यं चिरात्प्रकटीकृतम् ।
तव तु हृदये शीतेऽप्येवं सदैव सुखाप्तये
मम सहचरी सा निःस्नेहा मनागपि न स्थिता ॥ २.१०८ ॥[89]

कोपं विमुञ्च कुरु नाथ वचो मदीय-
माश्वासय स्मरकृशानुकृशां कृशाङ्गीम् ।
एकाकिनी कठिन तारकराजकान्त्या

---

[86] अथ ] P, D; अपि G. चोदाम॰ ] A, D; वोदाम॰ P; किंचित्तु G.

[87] अधिरूढ॰ ] G, P; अतिरूढ॰ D; अधिरूढं Ś. अस्याः पुनः ] G; आलोक्य च ] P, D; सख्या ] A, G, P, D; सद्यो Ś. ॰दृशः ] A, G, P; ॰दृशा D. सस्मेरं ] G, P, D; स्मेरान्ता Ś. ऽधि॰ ] G; च P, D.

[88] A reads imperatives throughout: परिरभ्यताम्, चुम्ब्यताम्, क्रियताम्, तन्यताम्. रुचिरं ] G, P, J; रुचितं A, D. चाटूच्चकैस्तन्यते ] A [तन्यताम्], P, D; चाटुत्वमातन्यते G; चाटूत्करैः स्तूयते J. निर्भ्रान्तं ] G, D, J; विज्ञातं P.

[89] ज्वलत्॰ ] G, D; ऽवलत्॰ P. ॰वसता ] G, P; ॰विशता D, Padyavali. शीते ] G (Ch), P, D; शान्ते G.

पञ्चत्वमाशु ननु यास्यति सा वराकी ॥ २.१०९ ॥[90]

अमुं दधेंऽशुकमहमत्र पादपे
युवामलं निभृतमिहैव तिष्ठतम् ।
रहःस्थयोरिदमभिधाय कामिनोः
पुरो ययौ निपुणसखी लतान्तरम्॥ २.११० ॥[91]

स्फुरति यदिदमुच्चैर्लोचनं तन्वि वामं
स्तनतटमपिधत्ते चारुरोमाञ्चमालाम् ।
कलयति च यदन्तःकम्पतामूरुकाण्डं
ननु वदति तदद्य प्रेयसा संगमं ते ॥ २.१११ ॥[92]

इत्यादि विविधं सख्यो व्यापारं कुर्वते सदा ।
योषितामत्र सर्वस्वं निधानकलशोपमाः॥ २.११२ ॥[93]

इत्थं विरचनीयोऽयं शृङ्गारः कविभिः सदा ।
अनेन रहितं काव्यं प्रायो नीरसमुच्यते ॥ २.११३ ॥

तव नाथानुरागोऽयं मद्विधैः कथमुच्यते ।
येनैकापि प्रिया नीता पञ्चत्वं पुण्यकारिणा ॥ २.११४ ॥[94]

इत्थं विचार्य प्रचुरप्रयोगा-

---

[90] कठिन तारक◦ ] G; कठिनतारक◦ P, D. ◦राज◦ ] P, D; ◦नाथ◦ G.

[91] दधेंऽशुकम् ] P, D; दधे शुकम् G (Pune). तिष्ठतम् ] G, P; तिष्ठताम् A, D. पुरो ] A, G, P; स्वयं D.

[92] ◦तटं ] P, D; ◦युगं G. अपि दत्ते ] G, D; अपिदत्ते P.

[93] अत्र सर्वस्वम् ] G; अत्र सर्वस्व◦ A, P; मन्त्रसर्वस्व◦ D.

[94] V. missing in A, excluded in D. पुण्यकारिणा ] G, P; पुण्यकारिणी G (v.l.).

न्योऽमुं निबध्नाति रसं रसज्ञः ।
तत्काव्यमारोप्य पदं विदग्ध-
वक्रेषु विश्वं परिबम्भ्रमीति ॥ २.११५ ॥

इति श्रीरुद्रभट्टविरचिते शृङ्गारतिलके काव्यरसालंकारे विप्रलम्भो नाम द्वितीयः परिच्छेदः ॥[95]

[95][∘भट्ट missing in some mss. see P. शृङ्गारतिलके ] A, G; शृङ्गारतिलकाभिधाने P, D [*check 1 and 3]

## तृतीयः परिच्छेदः

विकृताङ्गवचश्चेष्टावेषेभ्यो जायते रसः ।
हास्योऽयं हासमूलत्वात्पात्रत्रयगतो यथा ॥ ३.१ ॥[1]

किंचिद्विकसितैर्गण्डैः किंचिद्विस्फारितेक्षणैः ।
किंचिल्लक्ष्यद्विजैः सोऽयमुत्तमानां भवेद्यथा ॥ ३.२ ॥[2]

पाणौ कङ्कणमुत्फणः फणिपतिर्नेत्रं ज्वलत्पावकं
कण्ठः कुण्ठितकालकूटकुटिलो वस्त्रं गजेन्द्राजिनम् ।
गौरीलोचनलोभनाय सुभगो वेषो वरस्येति मे
गण्डोल्लासविभावितः पशुपतेर्हासोद्गमः पातु वः ॥ ३.३ ॥

मध्यमानां भवत्येष विवृताननपङ्कजः ।
नीचानां निपतद्बाष्पः श्रूयमाणध्वनिर्यथा ॥ ३.४ ॥

मुग्धा त्वं सुभगे न वेत्सि मदनव्यापारमद्यापि तं
नूनं ते जलजैषिणायमलिना दष्टो न भर्त्राधरः ।
सख्यैवं हसितं वधूं प्रति तथा सानन्दमाविर्भव-
द्वक्रान्तर्गतसीधुवासरसिकैर्भृङ्गैर्यथा धावितम् ॥ ३.५ ॥[3]

त्यक्त्वा गुञ्जफलानि मौक्तिकमयी भूषा स्तनेष्वाहिता
स्त्रीणां कष्टमिदं कृतं सरसिजं कर्णे न बर्हिच्छदम् ।
इत्थं नाथ तवारिधाम्नि शबरैरालोक्य चित्रस्थितिं

---

[1] ॰चेष्टा॰ ] P (R 15.11); ॰कृत्य॰ G, D. हासमूलत्वात् ] P, D; हास्यमूलात्मा G.

[2] ॰द्विजैः ] P, D; ॰द्विजः G.

[3] मुग्धा ] G; मुग्धे P, D. जलजैषिणा ] D; ऽब्जदलैषिना P; जलजेक्षणे G. दष्टो ] G, P; दृष्टो D. भर्त्राधरः ] P, D; ताम्राधरः G. तथा ] A, G, D; सदा P. ॰गत॰ ] P, D; ॰घन॰ G.

बाष्पार्द्रीकृतलोचनैः स्फुटरवं दारैः समं हस्यते ॥ ३.६ ॥[4]

अस्मिन्सखीकराघातनेत्रोल्लासाङ्गवर्तनम् ।
नासाकपोलविस्पन्दो मुखरागश्च जायते ॥ ३.७ ॥

शोकात्मा करुणो ज्ञेयः प्रियमृत्योर्धनक्षयात् ।
तत्रस्थो नायको दैवहतः स्याद्दुःखभाजनम् ॥ ३.८ ॥[5]

भर्ता सङ्गर एव मृत्युवसतिं प्राप्तः समं बन्धुभि-
र्यूनां काममियं दुनोति च मनो वैधव्यभावाद्वधूः ।
बालो दुस्त्यज एक एव च शिशुः कष्टं कृतं वेधसा
जीवामीति महीपते प्रलपति त्वद्वैरिसीमन्तिनी ॥ ३.९ ॥[6]

भूपातो दैवनिन्दा च रोदनं दीननिःस्वनः ।
शरीरताडनं मोहो वैवर्ण्यं चात्र जायते ॥ ३.१० ॥

क्रोधात्मको भवेद्रौद्रः प्रतिशत्रूनमर्षतः ।
रक्षःप्रायो भवेदत्र नायकोऽत्युग्रविग्रहः॥ ३.११ ॥[7]

यैः प्राणापहृतिः कृता मम पितुः क्षुद्रैर्युधि क्षत्रियै
रामोऽहं रमणीर्विहाय बलवन्निःशेषमेषां हठात् ।
भास्वत्प्रौढकुठारकोटिघटनाकाण्डत्रुटत्कन्धरा-

---

[4] ०च्छदः ] G, P; ०च्छदम् D. ०अर्द्री० ] P, D; ०अन्धी० G. हस्यते ] G, P, D; हास्यते A.

[5] ०मृत्योर् ] A; ०मृत्यु० ] G; ०भृत्य० P, D. तत्रस्थो ] A, P; तत्रेत्थं G, D.

[6] यूनां काममियं ] A, D; प्रौढा काममियं G; प्रौढानामनिशं P. ०लाभाद् ] G, P, ०बाधाद् A, ०भावाद् D.

[7] अमर्षतः ] A, G, D; अमर्षणं P.

स्रोतोऽन्तःस्रुतविस्रशोणितभरैः कुर्यां क्रुधां निर्वृतिम् ॥ ३.१२ ॥[8]

मुखरागायुधोत्क्षेपस्वेदकम्पाधरग्रहाः ।
शक्तिशंसा कराघातो भ्रुकुटिश्चात्र जायते ॥ ३.१३ ॥[9]

उत्साहात्मा भवेद्वीरो दयादानाजिपूर्वकः ।
त्रिविधो नायकस्तत्र जायते सत्त्वसंयुतः॥ ३.१४ ॥[10]

गाम्भीर्यौदार्यसौन्दर्यशौर्यधैर्यादिभूषितः ।
आवर्जितजनो जन्यनिर्व्यूढप्रौढविक्रमः ॥ ३.१५ ॥[11]

अयि विहङ्गवराक कपोतकं
विसृज धेहि धृतिं मम मेदसा ।
शिबिरहं भवता विदितो न किं
सकलसत्त्वसमुद्धरणक्षमः ॥ ३.१६ ॥[12]

मुषितोऽसि हरे नूनं भुवनत्रयमात्रलब्धितोषेण ।
बलिरर्थितदोऽस्मि यतो न याचितः किंचिदप्यधिकम्॥ ३.१७ ॥[13]

---

8 ∘हृतिः ] G, P; ∘हतिः D. बलवन्∘ ] P, D; बलवान् G. क्रुधां ] G, D; क्रुधो A, P.

9 भ्रुकुटिश् ] G, P; भ्रुकुटी D.

10 ∘आजि∘ ] P, D; ∘आदि∘ G.

11 जन्य∘ ] A, D; जन्ये P; बाढं G.

12 विहङ्गवराक ] G; विहङ्ग वराक D; वराककपोतकं P; कपोतवराककं A.

13 मुषितो ] G, P; सुखितो A, D. अप्यधिकम् ] G, P, D; अभ्यधिकम् A. ∘मात्रलब्धि∘ ] G, P, D; ∘लब्धिमात्र∘ G (Pu text). For cd, बलिरस्मि याचितोऽहं नो दूये किंचिदप्यधिकम् G (v.l.).

यत्रैरावणदन्ततीव्रमुसलैरेरण्डकाण्डायितं
वज्रेणापि विकीर्णवह्नितितिना मार्णालनालायितम् ।
मद्वक्षस्यवलम्ब्य किंचिदधुना तद्विस्मृतं वज्रिणा
युद्धं यद्यवलम्बते स तु पुनः सज्जोऽस्म्यहं रावणः ॥ ३.१८ ॥[14]

धृतिगर्वौद्धत्यमतिस्मृतिरोमाञ्चा भवन्ति चामुष्मिन् ।
विविधा वाक्यक्षेपाः सोत्साहामर्षवेगाश्च ॥ ३.१९ ॥[15]

भयानको भयस्थायिभावोऽसौ जायते रसः ।
शब्दादेर्विकृताद्गाढं बालस्त्रीनीचनायकः ॥ ३.२० ॥[16]

श्रुत्वा तूर्यनिनादं द्वारे भयचकितललितबाहुलतः ।
धन्यस्य लगति कण्ठे मुग्धशिशुर्धूलिधूसरितः ॥ ३.२१ ॥[17]

प्रणयकलहसङ्गान्मन्युभाजा निरस्तः
प्रकटितचटुकोटिः पादपद्मानतोऽपि ।
नवजलधरगर्जाद्भीतयासौ कथमचि-
त्त्रुटिततरलहारं सस्वजे प्राणनाथः ॥ ३.२२ ॥[18]

---

[14] यत्र० ] G, D; मत्त० P. ऐरावण० ] P, D; ऐरावत० G. ०दन्ततीव्र० ] P, D; ०तीव्रदन्त० G. ०ततिना ] G, P, D; ०कणिका G (Pu text). अधुना ] G, P, D; अमुना A. वज्रिणा ] P, D; वज्रिणो A [?], G. यद्य ] P, D: चेद् G. अवलम्बते ] G, P, D; अवलम्बसे [तु स] A.

[15] ०उद्धत्य० ] P, D; ०उद्धत० G.

[16] ०आदेर् ] A, G, D; ०आदि० P. विकृताद्गाढं ] G, P, D; विकृतत्वाच्च A. ०नीच० ] G, P, D; ०वृद्ध० A.

[17] ०चकितललित० ] G (चलित०), P, D; ०चलितगात्र० A. धन्यस्य ] P, D; नन्दस्य G. मुग्ध० ] P, D; कृष्ण० G.

[18] ०गर्जाद् ] A, G; ०गर्जैर् P; ०गर्जेर् D. कथंचित् ] G (text), कयाचित् P, D (G poss. in comm.)

कम्पोपरुद्धसर्वाङ्गैर्गलत्स्वेदोदबिन्दुभिः ।
त्वया लब्धैर्महीनाथ वैरिभिर्वनितायितम् ॥ ३.२३ ॥[19]

वैवर्ण्यगद्गदत्रासहस्तपादादिकम्पनम् ।
स्वेदास्यशोषदिक्प्रेक्षासंभ्रमाश्चात्र कीर्तिताः ॥ ३.२४ ॥[20]

जुगुप्साप्रकृतिर्ज्ञेयो बीभत्सोऽहृद्यदर्शनात् ।
श्रवणात्कीर्तनाद्वापि पूत्यादिविषयाद्यथा ॥ ३.२५ ॥[21]

लुठत्कृमिकलेवरं स्रवदसृग्वसावासितं
विशीर्णशवसंततिप्रसरदुग्रगन्धान्वितम् ।
भ्रमत्प्रचुरपत्रिकं त्रिकविवर्तिनृत्यक्रिया-
प्रवीणगुणिकौणपं परिबभौ परेताजिरम् ॥ ३.२६ ॥[22]

नासाप्रच्छादनं वक्रकूणनं गात्रसंवृतिः ।
निष्ठीवनादि चात्र स्यादुद्वेगादुत्तमेष्वपि ॥ ३.२७ ॥

विस्मयात्माद्भुतो ज्ञेयो रसो रसविचक्षणैः ।
मायेन्द्रजालदिव्यस्त्रीविपिनाद्युद्भवो यथा ॥ ३.२८ ॥[23]

---

[19] त्वया लब्धैर् ] G; त्वदारब्धैर् A, P; त्वया रुद्धैर् D.

[20] ◦गद्गदत्रास◦ ] G (R 15.8); अश्रु संत्रासः P, D. स्वेदास्यशोष◦ ] P, D; स्वेदः स्तम्भोऽथ G. ◦दिक्प्रेक्षासंभ्रमाश्च ] A, G (दिक्◦; सम्भ्रमश्च), D; दृक्क्षेपाः सम्भ्रमश्चP. कीर्तिताः ] G (comm.), D; कीर्तितः G (text), P.

[21]◦विषयाद् ] G, D; ◦विषयो P.

[22] विशीर्ण◦ ] P, D; विकीर्ण◦ G. विवर्ति◦ ] P, D; ◦विवर्त◦ G. ◦गुणि◦ ] G (comm.); ◦गुण◦ G (text), P, D; ◦गण◦ A.

[23] ◦विपिन◦ ] P, D; ◦विपण◦ G.

सत्यं हृता त्वया हंसवनितानामियं गतिः ।
भ्रमन्त्येतास्तथाप्येतदिन्द्रजालं तव प्रिये ॥ ३.२९ ॥[24]

गद्गदः साधुवादश्च स्वेदः पुलकवेपथू ।
दृष्टेर्निश्चलतारत्वं विकासश्चात्र जायते ॥ ३.३० ॥[25]

सम्यग्ज्ञानोद्भवः शान्तः समत्वात्सर्वजन्तुषु ।
गतेच्छो नायकस्तत्र तमोरागपरिक्षयात् ॥ ३.३१ ॥[26]

धनमहरहर्दत्तं स्वीयं यथार्थितमर्थिने
कृतमरिकुलं नारीशेषं स्वखड्गविजृम्भितैः ।
प्रणयिनि जने रागोद्रिक्ते रतिर्विहिता चिरं
किमपरमतः कर्तव्यं नस्तनावपि नादरः ॥ ३.३२ ॥[27]

निरालम्बं मनोऽन्यत्र बाढमात्मनि तिष्ठति ।
सुखे नेच्छा तथा दुःखेऽप्युद्वेगो नात्र जायते ॥ ३.३३ ॥[28]

अष्टावमी रसाः पूर्वं ये प्रोक्तास्तत्र निश्चितम् ।
प्रत्यनीकौ रसौ द्वौ द्वौ तत्सम्पर्कं विवर्जयेत् ॥ ३.३४ ॥[29]

---

[24] तव प्रिये ] A, G; तवाद्भुतम् P; तदद्भुतम् D.

[25] विकासश् ] G (M), D (R 15.10: [नयन]विकासः); विकाशश् G (Pu, Ch), P.

[26] तमो° ] G, D (R 15.15); मोह° P.

[27] स्वखड्ग° ] P, D; कृपाण G.

[28] ऽप्युद्वेगो नात्र ] P, D; नोद्वेगश्चात्र G.

[29] अमी ] G, D: इति A, P. निश्चितम् ] G, P, D: निश्चिताह A. प्रत्यनीकौ रसौ द्वौ द्वौ ] P, D; द्वौ द्वौ तेषां प्रत्यनीकौ G.

शृङ्गारबीभत्सरसौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥ ३.३५ ॥
हास्यो भवति शृङ्गारात्करुणो रौद्रकर्मतः ।
अद्भुतश्च तथा वीराद्बीभत्साच्च भयानकः ॥ ३.३६ ॥

यौ जन्यजनकावेतौ रसावुक्तौ मनीषिभिः ।
युक्त्या कृतोऽपि सम्भेदस्तयोर्बाढं न दुष्यति ॥ ३.३७ ॥

केचिद्रसविभागेषु भावाः पूर्वं प्रदर्शिताः ।
स्वातन्त्र्येणेह कीर्त्यन्ते रम्यास्ते कृतिनां मताः ॥ ३.३८ ॥[30]

रत्यादय इमे भावाः काव्याभिप्रायसूचकाः ।
पञ्चाशत्स्थायिसंचारिसात्त्विकास्तान्निबोधत ॥ ३.३९ ॥[31]

शृङ्गारादिरसेष्वेषु भावा रत्यादयः स्थिताः ।
प्रत्येकं स्थैर्यतोऽन्ये च त्रयस्त्रिंशच्चराः स्मृताः ॥ ३.४० ॥[32]

प्रायोऽनवस्थिते चित्ते भावाः संकीर्णसंभवाः ।
बाहुल्येन निगद्यन्ते तथाप्येते यथास्थिताः ॥ ३.४१ ॥[33]

शङ्कासूया भयं ग्लानिर्व्याधिश्चिन्ता स्मृतिर्धृतिः ।
औत्सुक्यं विस्मयोऽमर्षो व्रीडोन्मादौ मदस्तथा ॥ ३.४२ ॥
विषादो जडता निद्रावहित्थं चापलं मतिः ।

---

[30] प्रदर्शिताः ] P, D; प्रकीर्तिताः G.

[31] काव्य॰ ] A, G; रस॰ P, D.

[32] एषु ] G; एव P, D. स्थिताः ] A, G, P; स्मृताः D. स्थैर्यतो ] P, D; स्थायिनो G. स्मृताः ] P, D; यथा G.

[33] यथास्थिताः ] G; यथा स्थिताः P, D.

इति भावाः प्रयोक्तव्या शृङ्गारे व्यभिचारिणः ॥ ३.४३ ॥[34]

श्रमश्चपलता निद्रा स्वप्नो ग्लानिस्तथैव च ।
शङ्कासूयावहित्थं च हास्ये भावा भवन्त्यमी ॥ ३.४४ ॥[35]

दैन्यं चिन्ता तथा ग्लानिर्निर्वेदो जडता स्मृतिः ।
व्याधिश्च करुणे वाच्या भावा भावविशारदैः ॥ ३.४५ ॥[36]

हर्षोऽसूया तथा गर्व उत्साहो मद एव च ।
चापल्यमुग्रता वेगो रौद्रे भावाः प्रकीर्तिताः ॥ ३.४६ ॥[37]

अमर्षः प्रतिबोधश्च वितर्कोऽथ मतिर्धृतिः ।
क्रोधोऽसूयातिसंमोह आवेगो रोमहर्षणम् ॥ ३.४७ ॥[38]
गर्वो मदस्तथोग्रत्वं भावा वीरे भवन्त्यमी ।
संत्रासो मरणं चैव वचनीयं भयानके ॥ ३.४८ ॥

अपस्मारो विषादश्च भ्रमो रोगो मतिर्मदः ।
उन्मादश्चेति विज्ञेया भावा बीभत्ससंभसंभवाः ॥ ३.४९ ॥[39]

---

[34] स्मृतिर्धृतिः ] A, G, D; धृतिः स्मृतिः P. ऽमर्षो ] G; हर्षो P, D. व्रीडोन्मादौ ] G; व्रीडोन्मादो P, D. मतिः ] G, P; स्मृतिः D.

[35] ०हित्थं ] P, D; ०हित्थे G.

[36] वाच्या ] A, G, P; ज्ञेया D.

[37] मद ] A, G, D; ऽमर्ष P.

[38] अतिसंमोह ] G; श्रमो मोह P; अश्रु संमोह D.

[39] भ्रमो रोगो ] G [व्याधिर् M]; भयं रोगो A, P; भयं वेगो D.

आवेगो जडता मोहो विस्मयो हर्षणं मतिः ।
इति भावान्निबध्नन्ति रसेऽस्मिन्नद्भुते बुधाः ॥ ३.५० ॥[40]

एवं संचारिणो भावा ज्ञेयाः प्रतिरसं स्थिताः ।
सात्त्विकास्तु भवन्त्येते सर्वे सर्वरसाश्रिताः ॥ ३.५१ ॥[41]

कैशिक्यारभटी चैव सात्त्वती भारती तथा ।
चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचिकाः ॥ ३.५२ ॥[42]

या नृत्यगीतप्रमदोपभग-
वेषाङ्गसंकीर्तनचारुबन्धा ।
माधुर्ययुक्ताल्पसमासरम्या
वाणी स्मृतासाविह कैशिकीति ॥ ३.५३ ॥[43]

शृङ्गारहास्यकरुणरसानां परिवृद्धये ।
एषा वृत्तिः प्रयोक्तव्या प्रयत्नेन बुधैर्यथा ॥ ३.५४ ॥[44]

सौन्दर्यं शशलाञ्छनस्य कविभिर्मिथ्यैव तद्वर्ण्यते
शोभेयं क्व नु पङ्कजस्य रजनीसंयोगभग्नत्विषः ।
इत्यालोच्य चिराय चारु रुचिरं त्रस्यत्कुरङ्गीदृशो

---

[40] विस्मयो हर्षणं ] G, D; हर्षणं विस्मयो A, P.

[41] तु ] P, D; च G. ०आश्रिताः ] A, G; ०आश्रयाः P, D.

[42] Omit A, D.

[43] नृत्यगीत० ] P, D; गीतनृत्य० G. ०प्रमदोपभोग० ] P, D; ०प्रमदप्रयोग० G. वेष० ] P, D; देश० G. वाणी ] A, G, D; वृत्तिः P. ०ति ] P, D; तु G.

[44] ०रसानां परिवृद्धये ] P, D; रसातिशयसिद्धये G. प्रयोक्तव्या प्रयत्नेन ] P, D; प्रयत्नेन प्रयोज्या वि० G.

वीक्षेते नवयौवनोन्नतमुखौ मन्ये स्तनावाननम् ॥ ३.५५ ॥[45]

हस्तेषुः कुसुमायुधस्य ललितं रागश्रियो लोचनं
सौभाग्यैकगृहं विलासनिकषो वैदग्ध्यसिद्धिध्वजः ।
साक्षीदं मधुबान्धवस्य निभृतं कस्यापि लीलानिधेः
कक्षान्तर्नखमण्डनं सखि नवं प्रच्छाद्यतां वाससा ॥ ३.५६ ॥[46]

समुल्लसत्काञ्चनकुण्डलोज्ज्वल-
प्रभापि तापाय बभूव येष्वलम् ।
विलासिनीरम्यमुखाम्बुजन्मसु
प्रजज्वलुस्तेष्वकृशाः कृशानवः ॥ ३.५७ ॥

या चित्रयुद्धभ्रमशस्त्रपात-
मायेन्द्रजालप्लुतिलाङ्घिताढ्या ।
ओजस्विगुर्वक्षरगाढबन्धा
ज्ञेया बुधैः सारभटीति वृत्तिः ॥ ३.५८ ॥[47]

रौद्रे भयानके चैव बीभत्से च विचक्षणैः ।
काव्यशोभाकरी वृत्तिरियमित्थं प्रयुज्यते ॥ ३.५९ ॥[48]

शस्त्रोद्दारितकुम्भिकुम्भविगलद्रक्ताक्तमुक्ताफल-

---

[45] शोभेयं ] G, P; सौभाग्यं D. ०योग० ] A, P; ०भोग० G, D. रुचिरं ] G, P; रुचिमत् A, D.

[46] मधु० ] G, P; मद० D; मदमाधवस्य A लीलानिधेः ] P, D; लीलायितम् G. कक्षान्तर्, P, D; स्कन्धान्तर् G;स्कन्ध० A. नवं ] G, P, D; तव A.

[47] ०प्लुति० ] P, D; ०प्लुत० G. ०गुर्वक्षरगाढबन्धा ] A, G (text); ०गुर्वक्षरबन्धगाढा ] G (comm.), D; ०वर्णद्रुतदुर्विगाह्या P.

[48] प्रयुज्यते ] P, D; निबध्यते G.

स्फारस्फूर्जितकान्तिकल्पितबृहच्चञ्चच्चतुष्कायितम् ।
क्रोधोद्धावितधीरधोरणलसत्खड्गाग्रमुग्राग्रहं
युद्धं सिद्धवधूगृहीतसुभटं जातं तदा दुर्धरम् ॥ ३.६० ॥[49]

नायं गर्जिरवो गभीरपरुषं तूर्यं तदीयं त्विदं
नैते भीमभुजङ्गभोगरुचयो मेघा इमे तद्गजाः ।
इत्थं नाथ नवाम्बुवाहसमये त्वत्सैन्यशङ्काकुला
म्लायद्वक्ररुचो विरोधिवनितास्त्रस्यन्ति नश्यन्ति च ॥ ३.६१ ॥[50]

पिबन्नसृक्स्वदन्मांसमाकर्षन्नन्त्रमालिकाम् ।
कबन्धसंकुले क्रोष्टा भ्रमत्येष महारणे ॥ ३.६२ ॥[51]

हर्षप्रधानाधिकसत्त्वभावा
त्यागोत्तरोदारवचोमनोज्ञा ।
आश्चर्यसम्पत्सुभगा च या स्या-
त्सा सात्वती नाम मतात्र वृत्तिः ॥ ३.६३ ॥[52]

नातिगूढार्थसंपत्तिः श्रव्यशब्दमनोरमा ।
वीरे रौद्रेऽद्भुते शान्ते वृत्तिरेषा मता यथा ॥ ३.६४ ॥[53]

---

[49] शस्त्र॰ ] P, D; खड्ग॰ G. फल॰ ] A, G, P; फलं D. चतुष्कायितम् ] G, D; चतुष्कार्चितम् A, P. क्रोधोद्धा॰ ] P, D; क्रोधाद्धा॰ G. ॰धोरणलसत्॰ G (॰धोरणि॰), D; ॰धोरणिरणत्॰ A, P. उग्राग्रहं ] P, D; उग्रग्रहं A; ॰मुग्धग्रग्रहं G.

[50] भीम॰ ] P, D; भूमि॰ G.

[51] स्वदन् ] G, D; अदन् P.

[52] ॰भावा ] G; ॰वृत्तिस् P, D.

[53] ॰संपत्तिः ] P, D; ॰संप्राप्तिः G.

लक्ष्म्यास्त्वं जनको निधिश्च पयसां निःशेषरत्नाकरो
मर्यादानिरतस्त्वमेव जलधे ब्रूतेऽत्र कोऽन्यादृशम् ।
किं त्वेकस्य गृहागतस्य बडवावह्नेः सदा तृष्णया
क्लान्तस्योदरपूरणेऽपि न सहो यत्तन्मनाङ्मध्यमम् ॥ ३.६५ ॥[54]

स्फारितोत्कटकठोरतारका कीर्णवह्निकणसंततिः क्रुधा ।
दुर्निमित्ततडिदाकृतिर्बभौ दृष्टिरिष्टसमरांशुमालिनः ॥ ३.६६ ॥[55]

इदमद्भुतं नराधिप तव कीर्तिर्धवलयन्त्यपि जगन्ति ।
रक्तान्करोति सुहृदो मलिनयति च वैरिवदनानि ॥ ३.६७ ॥[56]

निवृत्तविषयासङ्गमधुना सुचिराय मे ।
आत्मन्येव समाधानं मनः केवलमिच्छति ॥ ३.६८ ॥

प्रधानपुरुषप्राया सद्वक्रोक्तिनिरन्तरा ।
भारतीयं भवेद्वृत्तिर्वीरहास्याद्भुताश्रया ॥ ३.६९ ॥

जन्मदेहवधबन्धनादिकं
तुल्यमेतदितरैः समं सताम् ।
यत्तथापि विपुलाश्चलाः श्रियः
साहसैकपरतात्र कारणम् ॥ ३.७० ॥[57]

---

[54] ◦[अ]निरतस् ] P, D; ◦[अ]भिरतस् G. क्लान्तस्य G (text), P, D; ◦[आ]क्रान्तस्य G (comm.). मनाङ्◦ ] A, G, D; महत् P.

[55] ◦[आ]कीर्ण◦ ] G; कीर्ण◦ P, D.

[56] इदम् ] G [cf. 3.72]; अत्य◦ P, D. मलिनयति च ] P, D; मलिनीयतीव G (text Pu).

[57] ◦वधबन्धन◦ ] D; ◦वधवेदन◦ P; ◦धनबन्दन◦ G; ◦देहमधनं मदादिं [sic] A. विपुलाश्चलाः ] G, P; विपुलाचलाः D. ◦परतात्र ] P, D; ◦परमत्र G.

यशोदाकृतरक्षस्य शासितुर्भुवनद्रुहाम् ।
बाल्ये निभृतगम्भीरो हरेर्हासः पुनातु वः ॥ ३.७१ ॥

निर्भयोऽप्येष भूपालस्तद्ददाति द्विषां युधि ।
असत्तेषु यशः शुभ्रमादत्ते चेदमद्भुतम् ॥ ३.७२ ॥[58]

इत्यादि रम्याः प्रविलोक्य वृत्ती-
र्दृष्ट्वा निबन्धांश्च महाकवीनाम् ।
आलोक्य चौचित्यमलं विदध्या-
त्काव्यं कविः सज्जनचित्तचौरम् ॥ ३.७३ ॥[59]

विरसं प्रत्यनीकं च दुःसंधानरसं तथा ।
नीरसं पात्रदुष्टं च काव्यं सद्भिर्न शस्यते ॥ ३.७४ ॥

विहाय जननीमृत्युशोकं मुग्धे मया सह ।
यौवनं मानय स्पष्टमित्यादि विरसं मतम् ॥ ३.७५ ॥[60]

प्रबन्धे नीयते यत्र रस एको निरन्तरम् ।
महतीं वृद्धिमिच्छन्ति विरसं तच्च केचन ॥ ३.७६ ॥[61]

नखक्षतोच्छलत्पूतिप्लुतगण्डस्थलं रतौ ।

---

[58] असत्तेषु ] G, D; दिगन्तेषु P.

[59] नि॰ ] P, D; प्र॰ G. आलोक्य ] P, D; आलोच्य G. चौचित्यम् ] A, P; वैचित्र्यम् G, D. इदं ] G, P, D; अलं A, G (M text).

[60] मतम् ] P, D; स्मृतम् G.

[61] विरसं ] A, G, P; नीरसं D.

स्मरामि वदनं तस्याः प्रत्यनीकं तदुच्यते ॥ ३.७७ ॥[62]

तामेवानुचितां गच्छ ज्वलिता त्वत्कृते तु या ।
किं ते कृत्यं मया धूर्त दुःसंधानरसं त्विदम् ॥ ३.७८ ॥

दुर्जनो दयितः कामं मनोग्लनो मनोभवः ।
कृतो वियोगतप्तायास्तस्या इत्यादि नीरसम् ॥ ३.७९ ॥[63]

मुग्धा व्याजं विना वेश्या कन्येयं निपुणा रतौ ।
कुलस्त्री सर्वदा धृष्टा पात्रदुष्टमिदं मतम् ॥ ३.८० ॥[64]

अन्येष्वपि रसेष्वेते दोषा वर्ज्या मनीषिभिः ।
यत्सम्पसम्पर्कान्न यात्येव काव्यं रसपरम्पराम् ॥ ३.८१ ॥[65]

इति मया कथितेन पथामुना
रसविशेषमशेषमुपेयुषी ।
ललितपादपदा सदलंकृतिः
कृतधियामिह वाग्वनितायते ॥ ३.८२ ॥[66]

शृङ्गारतिलको नाम ग्रन्थोऽयं कथितो मया ।

---

[62] ०पूति० ] G, D [०पूय० A]; ०रक्त० P. स्मरामि ] A, G, P; पिबामि D. तदुच्यते ] P, D; इदं मतम् G.

[63] मनोग्लानो ] G (Pu; ०ग्लानी M); मानो म्लानो P [xx म्लानो A]; मनो म्लानं D. कृतो ] G; कृशो P, D.

[64] इदं ] A, P; त्विदं D.

[65] रस० ] G, P, D; कवि० A, G (v.l.).

[66] पथा ] A, G, D; यथा P. उपेयुषी ] P, G; उपेयुषा A, D. ०पदा ] G, P; ०पदा० D.

व्युत्पत्तये निषेवन्तां कवयः कामिनः स्वयम् ॥ ३.८३ ॥[67]

कान्या काव्यकथा कीदृग्वैदग्धी को रसागमः ।
किं गोष्ठीमण्डनं हन्त शृङ्गारतिलकादृते ॥ ३.८४ ॥[68]

त्रिपुरवधादेव गतामुल्लासमुमां समस्तदेवनताम् ।
शृङ्गारतिलकविधिना पुनरपि रुद्रः प्रसादयति ॥ ३.८५ ॥[69]

इति श्रीरुद्रभट्टविरचिते शृङ्गारतिलकाभिधाने काव्यरसालंकारे
हास्यादिरसनिरूपणं नाम तृतीय: परिच्छेदः ॥[70]

---

[67] कथितो ] G; रचितो P; ग्रथितो D. निषेवन्तां ] G; निषेवन्ते P; निषेवन्तु D. कामिनः स्वयम् ] G; कामिनश्च यम् P; कामिनश्च ये D.

[68] 3.84-3.85 missing in G (M). कान्या ] G, P, D; का वा A. ◦तिलकादृते ] A, G, P; ◦तिलकं विना D.

[69] ◦विबुधनुताम् ] P; ◦विबुधनताम् G; ◦देवनताम् D; ◦विबुधानाम् A.

[70] शृङ्गारतिलकाभिधाने ] शृङ्गारतिलके A. हास्यादिरसनिरूपणं नाम ] missing in A, G.